मुखस्य सदृशं यथामुखं प्रतिबिम्बम् । निपातनादाद्यर्थेऽव्ययीभावः । सम सर्वं मुखं संमुखम् । समशब्दस्यान्तलोपो निपात्यते । यथामुखं दर्शनी यथामुखीनः । सर्वस्य मुखस्य दर्शनः संमुखीनः ॥

1807. The affix kha (ईन) comes in the sense of 'a mirror', after the words yathâmukha, and sanmukha being in the 6th case in construction.

The word दर्शन means that in which something is seen, such as, a looking glass, mirror &c, which reflects things The word यथामुख 'a reflection" is an Avyayibhâva compound, the meaning of यथा being that of likeness (II 1 6 S 652) Thus यथामुख दर्शन = यथामुखीन 'showing or reflecting the likeness of the face'—a mirror सर्वस्य मुखस्य दर्शन = सम्मुखीन 'showing or reflecting the whole face'—a looking glass. सम means 'all', and in forming the compound the final म of सम is elided

१८०८ । तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति । ५ । २ । ७ ॥

सर्वादेः पथ्याद्यन्तात् द्वितीयान्तात्खः स्यात् । सर्वपथान् व्याप्नोतीति सर्वपथीनः । सर्वाङ्गीणः । सर्वकर्मीणः । सर्वपत्रीणः । सर्वपात्रीणः ॥

1808. After the words pathi, aṅga, karman, patra or pâtra, preceded by sarva, being in the second case in construction, the affix kha (ईन) comes in the sense of "what pervades or fills the whole of that".

Thus सर्वपथान् व्याप्नोति = सर्वपथीनो रथः; सर्वाङ्गीणस्तापः, सर्वकर्मीणः पुरुषः, सर्वपत्रीणः सारथिः, सर्वपात्रीणः ओदनः ॥

१८०९ । आप्रपदं प्राप्नोति । ५ । २ । ८ ॥

पादस्याग्रं प्रपदं तन्मर्यादीकृत्य आप्रपदम् । आप्रपदीनः पटः ॥

1809. The affix kha (ईन) comes after the word âprapada, in the sense of "reaching thereto".

The word प्रपद means the 'top of the foot'. आ means "upto". आप्रपद is an Avyayîbhâva compound meaning 'to the top of the foot'. Thus आप्रपदं प्राप्नोति = आप्रपदीनः पटः 'cloth reaching to the end of the feet', i. e. showing the width of the cloth by comparison with the body.

१८१० । अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु । ५ । २ । ९ ॥

अनुरायामे सादृश्ये च । अनुपदं बद्धा अनुपदीना उपानत् । सर्वान्नानि भक्षयति सर्वान्नीनो भिक्षुः । अयानयः स्थानविशेषः । तं नेयो ऽयानयीनः शारः ॥

1810. The affix kha comes after the words anupada, sarvânna, and ayânaya, being in the second case in construction, in the senses of 'so bound', 'eating that', and 'to carry thereto' respectively.

Thus अनुपदं बद्धा = अनुपदीना 'a kind of shoe'; this word is always feminine. The force of अनु here is that of 'length' or 'likeness'. That is 'a shoe of the measure of a foot'. So सर्वान्नानि भक्षयति = सर्वान्नीनो भिक्षुः 'a mendicant who eats the whole food'. So also अयानयीनः शारः 'a chessman or piece that is taken to the position on the chess called ayânaya'. The word अयानय is compounded of two words अय, meaning 'going from right to left', and अनय 'from left to right', and it means a particular position in which the pieces moving from right to left and left to right cannot move further, and attack the other pieces.

Note:—According to some अयानयीन is the name of the front pieces in one's own row of chess-men. A piece which moves only on one side, does not admit

of this affix The piece which is carried from one side to another, admits of this affix Others move only in one direction पूर्व or अपर but not both Kaiyyata यस्तु धारं एक पार्श्वं एव सम्पतति तत्र न भवति प्रत्ययो यो हि धारः पार्श्वात् पार्श्वान्तरमानीयते, स एव प्रत्ययान्तः नीयते अन्यास्तु अयमेव नीयते अनयमेव नीयते वा ॥

१८११ । परोवरपरम्परपुत्रपौत्रमनुभवति । ५ । २ । १० ॥

परांश्चावरांश्चानुभवतीति परोवरीण । अवरस्योत्त्वं निपात्यते। परांश्च परतरांश्चानुभवति परम्परीण अनुभवे परम्परभावो निपात्यते । पुत्रपौत्राननुभवति पुत्रपौत्रीण । परम्पराशब्दस्तु अव्युत्पन्न एवास्ति स्त्रीलिङ्ग तस्मादेव स्वार्थे ष्यञिपारम्पर्यम् । कथं पारोवर्यमिति । असाधुरेवायम् । खप्रत्ययसन्नियोगेनैव परोवरेति निपातनात्

' 1811 The affix kha comes in the sense of "who witnesses or experiences that", after the words parovara, paramparа and putrapautra in the second case in construction.

The word परोवर is compounded of पर and अवर the अ in रो being irregular the compounding being caused by the affix परांश्चावरांश्च अनुभवति=परोवरीण ' who lives to see high and low The word परम्पर is compounded of पर and परतर the compounding being caused by the affix As परांश्च परतरांश्चानुभवति=परम्परीण ॥ Similarly पुत्रपौत्रीण ॥

The word परम्परा is a separate word as well, not formed by or admitting this affix As अविच्छिन्नपरम्परा मम विद्यास्ति ॥ This is a feminine word from this we get by shyañ without change of meaning पारम्पर्यम् । How do you explain the form पारोवर्यम् ? It is certainly incorrect because the form परोवर is valid only before the affix ख and nowhere else.

१८१२ । अवारपारात्यन्तानुकामं गामी । ५ । २ । ११ ॥

अवारपारगामी अवारपारीण । अवारीण । पारीण । पारावारीण । अत्यन्तं गामी अत्यन्तीन । भृशं गन्तेत्यर्थ । अनुकामं गामी अनुकामीन । यथेष्टं गन्तेत्यर्थ ॥

1812 The affix kha comes in the sense of 'who purposes to go", after the words avârapâra, atyanta, and anukâma, being in the accusative case in construction

The word गामी means 'गमिष्यति', see III 3 3 S 3171 The genitive case is prohibited by II 3 70 the word गामी governing the accusative Thus अवारपारगामी=अवारपारीण ॥

So also when the words are reversed As पारावारीण ॥ So also when the words are taken separately, as अवारीण and पारीण ॥ So also अत्यन्त गामी= अत्यन्तीन =भृशं गन्ता ॥ So also अनुकामीन =यथेष्ट गन्ता ॥

१८१३ । समांसमां विजायते । ५ । २ । १२ ॥

समायांसमायामिति विभक्त्यलुक च पूर्वपदनिपात्यते । समांसमीना गौः । समांसमीना सा यैव प्रतिवर्षं प्रसूयते ॥ खप्रत्ययानुत्पत्तौ यलोपो वा वक्तव्य * ॥ समांसमां विजायते । समायां समायां वा ॥

1813. The affix kha comes after the word samâmsamâm in the sense of 'who bears in the womb'.

The word विजायते means गर्भं धारयति 'who bears in the womb'. This verb governs the accusative of time समांसमां by II. 1. 29. S. 691. Thus समांसमां विजायते = समांसमीनः गौः, समांसमीना वडवा ॥

According to others the aphorism means "the affix comes in the sense of to give birth to or to get a young". i. e. विजायते = गर्भमोचनं ॥ According to them, the verb governs the locative समायां समायां विजायते = समांसमीना, the य् of the first समायां being elided, the rest of the vibhakti (आम्) remains. The word will mean "an animal that gives birth to a young one every year". See Amarakosha II. 9. 72.

Vârt:—Sometime there is no affixing, but the whole sentence is to be used to express this meaning, or the सुप् only of both members is to be elided and a sentence formed. As समां समां विजायते or समायां समायां विजायते ॥

१८१४ । अद्यश्वीनावष्टब्धे । ५ । २ । १३ ॥

अद्य श्वो वा विजायते अद्यश्वीना वडवा । आसन्नप्रसवेत्यर्थः । केचित्तु विजायते इति नानुवर्तयन्ति । अद्यश्वीनं मरणम् । आसन्नमित्यर्थः ॥

1814. The word adyaśvînâ is anomalous, meaning "a female near delivery".

The word विजायते is understood here. The word अवष्टब्ध means 'imminent, near'. It is formed by अव + स्तम्भ + क्त, the स् being changed to ष् by VIII. 3. 68. S. 2273. Thus अद्य वा श्वो वा विजायते = अद्यश्वीना वडवा "a mare likely give birth to-day or to-morrow".

Some do not read विजायते in to the sûtra, which then means "The word adyaśvîna is irregularly formed meaning *imminent*". As अद्यश्वीनं मरणं imminent death.

१८१५ । आगवीनः । ५ । २ । १४ ॥

आङ्पूर्वाद्गोः कर्मकरे खप्रत्ययो निपात्यते । गोः प्रत्यर्पणपर्यन्तं यः कर्म करोति स आगवीनः ॥

1815. The word âgavîna "a day-servant" is irregularly formed.

This word is formed by adding ख to the word गो preceded by the preposition आ, as आगो + ख = आगवीनः ॥ The force of the affix is that of 'a servant.' A person who is engaged in business till the return of the cows from pasture i. e. a day-labourer.

१८१६ । अनुग्वलंगामी । ५ । २ । १५ ॥

अनुगु । गोः पश्चात्पर्याप्तं गच्छति । अनुगवीनो गोपालः ॥

1816 The affix kha comes after the word anugu, in the sense of who is 'fit to follow'.

Thus the word अनुगु means गोः पश्चात् ॥ Thus अनुगु पर्याप्तं गच्छति = अनुगवीनः 'who is suited or able to follow after the cows i.e. a cowherd'

१८१७ । अध्वनो यत्खौ । ५ । २ । १६ ॥

अध्वानमलं गच्छति अध्वन्यः । अध्वनीनः । ये चाभावकर्मणोः । आत्माध्वानौ खे इति प्रकृतिभावः ॥

1817 The affixes yat (य) and kha (ईन) come after the word adhvan, in the above sense of 'who is fit or able to follow'

Thus अध्वानमलंगामी = अध्वनीनः or अध्वन्यः 'able to undertake a journey' By aphorisms VI 4 168-169 S 1154 and 1671 the word अध्वन् retains its original form before the affixes य and ख not losing its final अन्, which it does before other affixes by VI 4 144 S 679

१८१८ । अभ्यमित्राच्छ च । ५ । २ । १७ ॥

चाद्यत्खौ । अभ्यमित्रीयः । अभ्यमित्र्यः । अभ्यमित्रीणः । अमित्राभिमुखं सुष्ठु गच्छतीत्यर्थः ॥

1818 The affix Chha (ईय) also as well as yat and kha comes after the word abhyamitra, in the sense of 'who is able to go'

The च draws in यत् and ख ॥ Thus अभ्यमित्रं गच्छति = अभ्यमित्रीयः अभ्यमित्र्यः अभ्यमित्रीणः a warrior who valiantly encounters his enemy = अमित्राभिमुखं सुष्ठु गच्छति ॥

१८१९ । गोष्ठात्खञ् भूतपूर्वे । ५ । २ । १८ ॥

गोष्ठो भूतपूर्वः गौष्ठीनो देशः ॥

1819 The affix khañ comes after the word goshtha in the sense of 'it formerly had been'

The word गोष्ठ is a compound of गो+स्था i.e. a cow pen it means the place all around a cow pen The word भूतपूर्व qualifies it. Thus गोष्ठः भूतपूर्वः = गौष्ठीनो देशः 'a place which was formerly a Goshtha' Otherwise when not meaning formerly we have गोष्ठो यसे ॥

१८२० । अश्वस्यैकाहगमः । ५ । २ । १९ ॥

एकाहेन गम्यत इत्येकाहगमः । आश्वीनोऽध्वा ॥

1820 The affix khañ comes after the word aśva, in the genitive case in construction the sense being 'what is travelled over or traversed in one day'

The word अश्वस्य being in the sixth case shows the construction it should have before the affix. The एकाहगमः means एकाहेन गम्यते i. e, what is or can be gone over in one day. Thus अश्वस्यैकाहगमोऽध्वा = आश्वीनः। as आश्वीनानि शतं पतित्वा = यावन्ति योजनान्यैकाह्नाश्वेन गम्यन्ते तावतां शतं गत्वा ॥ सहस्राश्वीने वा इतः स्वर्गो लोकः ॥

१८२१ । शालीनकौपीने अधृष्टाकार्ययोः । ५ । २ । २० ॥

शालाप्रवेशमर्हति शालीनः अधृष्टः । कूपपतनमर्हति कौपीनं पापम् । तत्साधनत्वात्पुरुषलिङ्गमपि । तत्संबन्धात्तदाच्छादनमपि ॥

1821. The word sâlîna and kaupîna are anomalous, when meaning 'modest' and 'a shameful action' respectively.

The word अधृष्ट means 'not proud'; अकार्यम् means 'unfit to be done' i. e. an infamous act. The words come from शाला* "a hall" and कूप 'a well'. It is not easy to trace any connection between 'modesty' and 'a hall', or between 'shameful' and 'a well'. However some say शालाप्रवेशमर्हति 'who deserves to enter a hall', = शालीनः, कूपावतारमर्हति 'who deserves to be thrown into a well' कौपीनः, hence a thing to be concealed as the male organ; and the dress that conceals it. As शालीनो जनः, कौपीनं पापं ॥.

१८२२ । व्रातेन जीवति । ५ । २ । २१ ॥

व्रातेन शरीरायासेन जीवति नतु बुद्धिवैभवेन स व्रातीनः ॥

1822. The affix khañ comes after the word vrâta in the third case in construction, the sense being "who leads this life, or who lives by this".

The word व्रात means a multitude or mass composed of various castes, who have no fixed employment, and live by violence, or by bodily labor. व्रातेन जीवति = व्रातीनः 'a person who lives by the labour of his body, and not by the power of his brain'.

१८२३ । साप्तपदीनं सख्यम् । ५ । २ । २२ ॥

सप्तभिः पदैरवाप्यते साप्तपदीनम् ॥

1823. The word sâptapadîna is anomalous, when meaning 'friendship'.

The word साप्तपदीन comes from सप्तपद but the connection of senses is not very clear. It is said सप्तभिः पदैरवाप्यते = साप्तपदीनम् "formed by walking together seven steps or by talking together seven words".

Note:—The circumambulation of the Fire by the bride and bridegroom in seven steps makes the marriage irrevocable. साप्तपदीनं seems to have some connection

with that. The word सामपदीन or के means 'a friend' also; the abstract sense being made applicable by analogy to the person as well.

१८२४ । हैयङ्गवीनं संज्ञायाम् । ५ । २ । २३ ॥

ह्योगोदोहस्य हियङ्गुरादेशः विकारार्थे खञ् च निपात्यते । दुह्यत इति दोहः क्षीरम् । ह्योगोदोहस्य विकारो हैयङ्गवीनं नवनीतम् ॥

1824. The word "haiyaṅgavīna" is anomalous, when it is a Name.

The word हैयङ्गवीनम् means 'fresh butter'. The word comes from ह्यः 'yesterday' and गोदोह 'cow's milk'. ह्यो गोदोहस्य विकारः 'prepared from yesterday's milk' i. e. "fresh butter'. The affix does not come in the sense of any विकार in general. There is no affixing in ह्यो गोदोहस्य विकार when it means उदश्वित् or 'whey'.

१८२५ । तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ । ५ । २ । २४ ॥

पीलूनां पाकः पीलुकुणः । कर्णस्य मूलं कर्णजाहम् ॥

1825. The affixes kuṇap (कुण) and jāhach (जाह) come after the words pilu &c and karṇa &c respectively, when the senses are respectively 'the fruiting-season of this' and 'the root of this'.

The word तस्य shows that the construction must be genitive The affix कुणप् comes after पील्वादि words, signifying 'ripening', and the affix जाहच् comes after कर्णादि words signifying the 'root'.

Thus पीलूनां पाकः = पीलुकुणः, कर्कन्धुकुणः, so also कर्णस्य मूलं = कर्णजाहम् ॥

1 कर्ण, 2 अक्षि, 3 नख, 4 मुख, 5 केश, 6 पाद, 7 गुल्फ, 8 भ्रू, 9 शृङ्ग (भ्रूभङ्ग' भ्रूशृङ्ग), 10 दन्त, 11 ओष्ठ, 12 पृष्ठ, 13 नख, 14 अङ्गुष्ठ ॥

1 पीलु, 2 कर्कन्धु (°न्धू), 3 शमी, 4 करीर, 5 कुवल, 6 बदर, 7 अश्वत्थ, 8 खदिर ॥

१८२६ । पक्षात्तिः । ५ । २ । २५ ॥

मूलमित्यनुवर्तते । पक्षस्य मूलं पक्षतिः ॥

1826. The affix ti (ति) comes after the word paksha in the genitive case in construction, in the sense of 'the root of it'.

Note:—The word मूल of the last sūtra is drawn into this aphorism; and not the word पाक as well This is an exceptional case of अनुवृत्ति, generally the whole is drawn and not a portion Hence arises the following maxim क्वचिदेकदेशोऽप्यनुवर्तते "Sometimes it also happens that only a part of the words of a rule which are mutually connected is valid in a subsequent rule, while the rest ceases to be valid'.

Thus पक्षस्य मूलं = पक्षतिः i. e. प्रतिपत् 'the root or the first day of a Paksha or a fortnight'.

१८२७। तेन वित्तश्चुञ्चुप्चणपौ। ५। २। २६॥

यकारः प्रत्ययोरादौ लुप्तनिर्दिष्टस्तेन चस्य नेत्संज्ञा। विद्यया वित्तो विद्याचुञ्चुः। विद्याचणः॥

1827. The affixes chuñchup (चुञ्चु) and chaṇap (चण) come after a word in the third case in construction, in the sense of 'celebrated through this'.

The word वित्त means known, illustrious. Thus विद्यया वित्तः = विद्याचुञ्चुः, विद्याचणः, केशचणः॥ The initial च् in these affixes is not इत् (I. 3. 7. S. 189) because the affixes really are यचुञ्चुप् and यचणप्॥ Thus य् is elided after words. So च् is not the initial of an affix, and does not get इत् designation.

१८२८। विनञ्भ्यां नानाञौ न सह। ५। २। २७॥

असहार्थे पृथग्भावे वर्तमानाभ्यां स्वार्थे प्रत्ययौ। विना। नाना॥

1828. The affixes ना and नाञ् come respectively after the words वि and नञ्, in the sense of 'not being together'.

Thus वि + ना = विना 'without'; नञ् + नाञ् = नाना 'several'.

१८२९। वेः शालच्छङ्कटचौ। ५। २। २८॥

क्रियाविशिष्टसाधनवाचकात्स्वार्थे। विस्तृतम् विशालम्। विशङ्कटम्॥

1829. The affixes śâlach (शालच्) and śaṅkaṭach (शंकटच्) come after the preposition वि, without changing the sense.

Thus विगत शृङ्गम् = विशालम् विशंकटम्॥ Thus these words may apply to a cow, as विशालः, विशंकटः॥ According to some these words are adjectives meaning 'great, large' &c. There is no connection here of the sense of the base and the affix.

१८३०। संप्रोदश्च कटच्। ५। २। २९॥

सङ्कटम्। प्रकटम्। उत्कटम्। चाद्विकटम्॥ अलाबूतिलोमाभङ्गाभ्यो रजस्युपसंख्यानम्॥ अलाबूनां रजः अलाबूकटम्॥ गोष्ठजादयः स्थानादिषु पशुनामभ्यः॥ गवां स्थानं गोगोष्ठम्॥ [illegible] कटच्॥ अवीनां समूहोऽविकटः॥ विस्तारे पटच्॥ अविपटः॥ द्वित्वे गोयुगच्॥ [illegible] उष्ट्रगोयुगम्॥ षट्त्वे षड्गवच्॥ [illegible]॥ स्नेहे तैलच्॥ तिलतैलम्। सर्षपतैलम्॥ [illegible] शाकटशाकिनौ॥ इक्षुशाकटम्। इक्षुशाकिनम्॥

1830. The affix kaṭach (कट) comes after the words sam, pra, ud, (and vi).

The वि is read into the sûtra by virtue of the word च [illegible]

प्रकटम्, उत्कटम्, विकटम्॥

Vârt —The affix कटच् comes after अलाबु, तिल, उमा, and भङ्गा in denoting dust thereof As अलाबूनां रज = अलाबूकटम्, तिलकटम्, उमाकटम्, भङ्गाकटम् ॥&c.

Vârt —The affix गोष्ठच् comes after the names of animals, in denoting the places As गवां स्थानं = गोगोष्ठं &c

Vârt —When a flock is denoted, the affix कटच् is added, as अविकटः ॥

Vârt —When spreading is denoted, the affix is पटच्, and अविपट ॥

Vârt —When a couple is denoted, the affix is गोयुगच्, as उष्ट्रगोयुगम् ॥

Vârt —When six is denoted, the affix is षड्गवच्, as अश्वषड्गवम् ॥

Vârt — The affix तैलच् comes when it means the oil of it. As तिलतैलम्, सर्षपतैलम् ॥

Vârt :—The affixes शाकट and शाकिन denote 'a field where it grows', after the words इक्षु &c As इक्षुशाकटम्, इक्षुशाकिनम् ॥

१८३१ । अवात्कुटारच्च । ५ । २ । ३० ॥

चात्कटच् । अवाचीनोऽवकुटार । अवकट ॥

1831. The affix कुटारच् as well as कटच् comes after the word अव ॥

As अवकुटार', अवकट 'downwards,' 'very deep'.

१८३२ । नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः । ५ । २ । ३१ ॥

अवादित्येव । नत नमनम । नासिकाया नत अवटीटम् । अवनाटम् । अवभ्रटम् । तद्योगान्नासिका अवटीटा । पुरुषोऽप्यवटीट ॥

1832. The affixes टीटञ्, नाटच् and भ्रटच् come after the word अव, in the sense of a hooked nose, when the word so formed is a Name

Thus नासिकाया नतम् = अवटीटम्, or अवनाटम् अवभ्रटम् ॥ The word signifies the nose, as well as the person also, as अवटीटा नासिका अवटीटः पुरुष ॥

१८३३ । नेर्बिडज्बिरीसचौ । ५ । २ । ३२ ॥

निबिडम् । निबिरीसम् ॥

1833 The affixes बिडच् and बिरीसच् come after the word नि, in the above sense of hooked nose, the whole word, being a Name

Thus निबिडम् and निबिरीसम् ॥

Note —How do you say निबिडा केशा or निबिडं वस्त्रम् ? It is by analogy.

१८३४ । इनच् पिटच् चिक चि च । ५ । २ । ३३ ॥

नेरित्व । नासिकाया नतेऽभिधेये इनच्पिटचौ प्रत्ययौ प्रकृतेश्चिक चि इत्यादेशौ च । कप्रत्यय-चिकादेशोऽप्य वक्तव्यौ * । चिकिनम । चिपिटम् । चिक्कम् ॥ क्लिन्नस्य चिल् पिल् लश्चास्य चक्षुषी * । क्लिन्न चक्षुषी अस्य चिल्ल । पिल्ल ॥ चुल् च * ॥ चुल्ल

1834. The affixes इनच् and पिटच् come after the word नि in the above sense of a hooked nose; and चिक् and चि are the substitutes of नि before those affixes respectively.

Thus नि + इनच् = चिक् + इनच् = चिकिनः ; नि + पिटच् = चि + पिटच् = चिपिटः ॥

Vârt :—So also comes क, and चिक् replacing नि, as नि + क = चिक् + क = चिक्कः ॥

Vârt :—The affix ■ comes after the word क्लिन्न in the sense of 'its eyes'; and चिल् and पिल् are substitutes of क्लिन्नः as क्लिन्ने अस्य चक्षुषी = चिल्लः, पिल्लः 'blear-eyed'

Vârt :—चुल् is also the substitute. As चुल्लः ॥

Note :—These words apply to the 'eye' also, as चिल्ले, पिल्ले, चुल्ले "sore-eyes." They apply to 'person' also.

१८३५। उपाधिभ्यां त्यकन्नासन्नारूढयोः। ५। २। ३४ ॥

संज्ञायामित्यनुवर्तते। पर्वतस्यासन्नं स्थलमुपत्यका। आरूढं स्थलमधित्यका ॥

1835. The affix tyakan (त्यक) comes after the words upa and adhi, in the sense of 'nearness' and 'elevation' respectively; the words so formed being Names

Thus उपत्यका = पर्वतस्यासन्नम् lowland, a land at the foot of the mountain, अधित्यका = पर्वतस्यारूढम् a table-land, high-land.

Note :—The rule VII. 3. 44 S. 463 does not apply here, so we do not get the forms उपत्यिका or अधित्यिका ॥

१८३६। कर्मणि घटोऽठच्। ५। २। ३५ ॥

घटत इति घटः। पचाद्यच्। कर्मणि घटते कर्मठः पुरुषः ॥

1836. The affix aṭhach (अठ) comes after the word karma, in the seventh case in construction, in the sense of 'employing oneself zealously in it.'

The word घट means zealous work. It is formed from $\sqrt{\text{घट}}$ with the अच् of the PachAdi. Thus कर्मणि घटते = कर्मठः पुरुषः 'a clever, proficient person.'

१८३७। तदस्य संजातं तारकादिभ्य इतच्। ५। २। ३६ ॥

तारकाः संजाता अस्य तारकितं नभः। आकृतिगणोऽयम् ॥

1837. The affix itach (इत) comes after the words târakâ &c. in the first case in construction, in the sense of 'that whereof this is observed'.

Thus तारकाः संजाता अस्य नभसः = तारकितं नभः 'a starry sky' i. e. a night in which stars are visible. पुष्पितो वृक्षः 'a tree in which flowers have grown'.

The तारकादि class is आकृतिगण ॥

1 तारका, 2 पुष्प, 3 कर्णक, 4 मञ्जरी*, 5 ऋजीष, 6 क्षण*, 7 सूत्र (सूत्रक), 8 मू
9 निष्क्रमण, 10 पुरीष, 11 उच्चार, 12 प्रचार 13 विचार, 14 कुड्मल, 15 कण्टक, 16 मुसल*,
मुकुल, 18 कुसुम, 19 कुतूहल, 20 स्तबक, 21 किसलय, 22 पल्लव, 23 खण्ड, 24 वेग, 25 निद्रा,
मुद्रा, 27 बुभुक्षा, 28 धेनुष्या, 29 पिपासा, 30 श्रद्धा, 31 अभ्र, 32 पुलक, 33 अङ्गारक, 34 वर्ण
35 द्रोह, 36 दोह, 37 सुख, 38 दुःख, 39 उत्कण्ठा (उत्कण्ठ), 40 भर, 41 व्याधि, 42 वर्मन्*,
व्रण*, 44 गौरव*, 45 शास्त्र, 46 तरङ्ग, 47 तिलक, 48 चन्द्रक (चन्द्र) 49 अन्धकार, 50
51 मुकुर, 52 हर्ष, 53 उत्कर्ष, 54 रण*, 55 कुवलय, 56 गर्ध, 57 क्षुध् (क्षुधा), 58 सीमन्त,
ज्वर, 60 गर*, 61 रोग, 62 रोमाञ्च, 63 पण्डा, 64 कज्जल, 65 तृष्*, 66 कोरक, 67 कल्लोल,
स्थपुट,* 69 फल, 70 कञ्चुक*, 71 शृङ्गार*, 72 अङ्कुर, 73 शैवल*, 74 बकुल*, 75 श्वभ्र*,
आराल*, 77 कलङ्क, 78 कर्दम, 79 कन्दल, 80 मूर्च्छा*, 81 अङ्गार, 82 हस्तक (हस्त), 83 प्रतिबिम्ब
84 विघ्नतन्त्र (विघ्न, तन्त्र)*, 85 प्रत्यय*, 86 दीक्षा*, 87 गर्ज, 88 गर्भादप्राणिनि (गर्भित, साल
but गर्भिणी गौः), 89 संज्ञा, 90 स्तबक 91 फर, 92 कल्लोल, 93 ओर, 94 राग ॥

१८३८ । प्रमाणे द्वयसज्दघ्नञ्मात्रचः । ५ । २ । ३७ ॥

सत्येवेत्यनुवर्तते । ऊरु प्रमाणमस्य ऊरुद्वयसम् । ऊरुदघ्नम् । ऊरुमात्रम् ॥ प्रमाणे लः * ॥ शम
र्दिष्टिः । वितस्तिः ॥ द्विगोर्नित्यम् * ॥ द्वौ शमौ प्रमाणमस्य द्विशमम् ॥ प्रमाणपरिमाणाभ्यां संख्यायाश्च
संशये मात्रज्वक्तव्यः * ॥ शममात्रम् । प्रस्थमात्रम् । पञ्चमात्रम् । वत्स्वार्थे द्वयसज्दघ्नचौ बहुलम्
तावेव मात्रद्वयसम् । तावन्मात्रम् ॥

1838 The affixes dvayasach (द्वयस) daghnach (दघ्न
and mâtrach (मात्र), come in denoting "that whereof this
the lineal measure" after a word in first case in constructio

The word सत्य is understood here. Thus ऊरुः प्रमाणमस्य=ऊरुद्वयस
ऊरुदघ्नम्, ऊरुमात्रम् 'as high as the thigh'.

Note—As ऊरुद्वयसमुदकम् 'water reaching upto the thigh'. According
some the first and the second affixes (*dvayasa* and *daghna*) come in denoting
measure of altitudes and depths, and not horizontal measures. The affix मात्रच् co
in a general sense also As हस्तमात्रम् 'a cubit long'.

Vârt—The affixes denoting lineal measure are elided after wo
which are themselves recognised as standards of measure. Thus शमः प्रमाण
=शमः 'that which is śama (a hand) in length'. Similarly दिष्टिः, वितस्तिः ॥

Note:—The affix mâtra only is elided, the other two affixes are never applie
to these words.

Vârt:—The elision is invariable after a Dvigu. As द्वौ शमौ प्रमाणम
=द्विशमम् ॥

Note.—Why do we say "invariable"? The elision will take place ev
where there is doubt द्वे दिष्टी स्यातां वा न वा=द्विदिष्टि ॥

Vârt—The affix मात्रच् comes after words denoting lineal measu
and mass measure, and after a numeral, even when there is doubt.

शमामात्रम् = शमः प्रमाणमस्य स्यात्र वा, मत्स्यमात्रम्, पंचमात्रम् ॥ An exception to this is contained in the 2nd Vârtika, where mâtra is elided in Dvigu compounds, owing to the word नित्य being used there.

Vârt :—The affixes द्वयसच् and मात्रच् come without changing the sense, diversely after a word ending in वतु ; as तावद्द्वयसम्, = तत् परिमाणमस्य धान्यादितावत् तावन्मात्रम् &c.

१८३९ । पुरुषहस्तिभ्यामण् च । ५ । २ । ३८ ॥

पुरुषः प्रमाणमस्य पौरुषम् । पुरुषद्वयसम् । हास्तिनम् । हस्तिद्वयसम् ॥

1839. The affix aṇ also, as well dvayasach &c, comes after the words purusha and hasti, in the first case in construction in the sense of 'that whereof this is the lineal measure.'

The phrase तदस्य प्रमाणं is understood here. By च the affixes द्वयसच् &c are drawn in. Thus पुरुषः प्रमाणमस्य = पौरुषम्, पुरुषद्वयसम्, पुरुषदघ्नम्, पुरुषमात्रम्, हस्तिद्वयसम्, हस्तिदघ्नम्, हस्तिमात्रम्, हास्तिनम् ॥

Note :—The affix is always elided after a Dvigu. As द्विपुरुषद्वयकम्, त्रिपुरुषम्, द्विहस्ति, त्रिहस्ति, द्विपुरुषी, त्रिपुरुषी, द्विहस्तिनी, त्रिहस्तिनी ॥

१८४० । यत्तदेतेभ्यः परिमाणे वतुप् । ५ । २ । ३९ ॥

यत्परिमाणमस्य यावान् । तावान् । एतावान् ॥

1840. The affix vatup (वत्) comes after the words yad, tad, and etad, being in the first case in construction, in signifying "that whereof this is the measure of volume".

The phrase तदस्य is understood here. As यत् परिमाणमस्य = यावान् । This form is thus evolved; यत् + वतुप् = यावत् (the ti अत् being replaced by आ by VI. 3. 91) = यावन्त् (the नुम् being added by VII. 1. 70) = यावान्त् (the अ being lengthened by VI. 4. 41); the vibhakti सु being elided by VI. 1. 68, S. 252, and त् being elided by VIII. 2. 23 we get finally यावान्, तावान्, एतावान् ॥

१८४१ । किमिदम्भ्यां वो घः । ५ । २ । ४० ॥

आभ्यां वतुप्स्याद्वस्य च घः । कियान् । इयान् ॥

1841. After the words kim and idam, घ (इय्) is substituted for the व् of vatup.

Thus किम् + वतुप् = की + वतुप् (VI. 3. 90) = क् + घतुप् (VI. 4. 148) = कियत् nom. कियान्. Similarly इयत् nom, इयान् ॥

१८४२ । किमः संख्यापरिमाणे डति च । ५ । २ । ४१ ॥

स्याद्वतुप् । वस्य च घः स्यात् । का संख्या येषां ते कति । कियन्तः ॥

1842 The affix ḍati (अति with the elision of इस) as well as the affix vatup comes after the word किम्, in the first case in construction, in the sense of 'numerical quantity'.

The प् introduces the affix वतुप् which is changed into घतुप् (इयत्). The word संख्यापरिमाणे means संख्यायाः परिमाणं i [illegible] संख्यापरिच्छेदः making estimate by numbers As का संख्या परिमाणं येषां ब्राह्मणानां=कति ब्राह्मणाः or कियन्तो ब्राह्मणाः how many Brahmanas in number do you estimate these This always comes in the plural

१८४३ । संख्याया अवयवे तयप् । ५ । २ । ४२ ॥

पञ्चावयवा अस्य पञ्चतयं दारु ॥

1843 The affix tayap (तय) comes after a numeral, in the sense of "that whereof the parts are so many".

The word तस्य is understood here Thus पञ्च अवयवा अस्य=पञ्चतयम् having five parts The part being connected with the whole, the force of the affix is to denote the whole

१८४४ । द्वित्रिभ्यां तयस्यायज्वा । ५ । २ । ४३ ॥

द्वयम् । द्वितयम् । त्रयम् । त्रितयम् ॥

1844 The affix ayach (अयं) is optionally the substitute of tayap, after words dvi and tri

As द्वाववयवावस्य=द्वयम्, or द्वितयम्, त्रयम् or त्रितयम् 'a couple' 'a triad' (VI 4. 148)

१८४५ । उभादुदात्तो नित्यम् । ५ । २ । ४४ ॥

उभशब्दात्तयपोऽयच् स्यात् स चाद्युदात्तः । उभयम् ॥

1845 After the word udha, ayach is always the substitute for tayap, having the acute (udâtta) accent on its first syllable

Note:—The affix अयच् having indicatory च् takes the acute accent on the final syllable (VI 1 163 S 3710) i e on य the special mention of udâtta in the sûtra shows that the accent should be on a syllable which would otherwise not have taken it i e the first syllable i e उ for had this not been the meaning, there was no necessity of using the word udâtta in the sûtra

If उभ is a Sankhyâ word (I 1 [illegible] 258), in the classical sense it would have taken अयच् the present sûtra ordains अयं instead as a substitute always If it is not a Sankhyâ, then we should first ordain तयप् after it by the process of splitting the sûtra V [illegible] 42 into two, thus संख्याया तयप्, अवयवे तयप् and then replace तयप् by अयं ॥

Thus उभौ पीतसाहसो अवयवौ अस्य=उभयम् ॥ उभये देवमनुष्याः । उभयो मणि ॥

१८४६ । तदस्मिन्नधिकमिति दशान्ताड्डः । ५ । २ । ४५ ॥

एकादश अधिका अस्मिन्नेकादशम् ॥ शतसहस्रयोरेवेष्यते * ॥ नेह एकादश अधिका अस्यां त्रिंशतौ ॥ प्रकृतिप्रत्ययार्थयोः समानजातीयत्व एवेष्यते * ॥ नेह । एकादश माषा अधिका अस्मिन् सुवर्णशते ॥

1846. The affix ḍa (अ with the elision of अन् of the base), comes after a Numeral ending in daśan, being in the first case in construction, in the sense of "this is surplus in it".

Thus एकादश अधिका अस्मिन् शते = एकादशं शतं "hundred + eleven". So also एकादशं सहस्रं ॥

Ishti :—This applies only after शत and सहस्र, therefore, it does not apply here :—एकादशाधिकाः अस्यां त्रिंशतौ ॥

Ishti :—This rule applies when both words denote a thing of the same denomination. As एकादश कार्षापणा अधिका अस्मिन् कार्षापणशते = एकादशं कार्षापणशतं ॥ But not here :—एकादश माषा अधिका अस्मिन् सुवर्णशते ॥

Note :—The word इति in the sûtra is for clearness. The rule applies to शतसहस्रं also, as एकादशं शतसहस्रं which may mean either (1) एकादश शतान्यधिकान्यस्मिन् or (2) एकादश सहस्राण्यधिकान्यस्मिन् ॥

१८४७ । शदन्तविंशतेश्च । ५ । २ । ४६ ॥

डः स्यादुक्तेऽर्थे । त्रिंशदधिका अस्मिन् त्रिंशं शतम् । विंशम् ॥

1847. The affix ḍa comes in the sense of "this is surplus in it", after a Numeral ending in शत् and after विंशति; with the elision of अत् and अति ॥

The Indicatory ड causes elision of टि portion VI. 4, 142; S. 844. Thus त्रिंशदधिका अस्मिञ्छते = त्रिंशं शतं

Note :—This rule applies to abstract Numerals. Hence not here, गोत्रिंशदधिका अस्मिन् गोशते ॥

So also after विंशति; as विंशं शतं ॥

१८४८ । संख्याया गुणस्य निमाने मयट् । ५ । २ । ४७ ॥

भागस्य मूल्ये वर्तमानात्प्रथमान्तात्संख्यावाचिनः षष्ठ्यर्थे मयट् स्यात् । यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य द्विमयमुदश्विद्यवानाम् । गुणस्येति किम् । द्वौ व्रीहियवौ निमानमस्योदश्वितः । निमाने किम् । द्वौ गुणौ क्षीरस्य एकस्तैलस्य द्विगुणं क्षीरं पच्यते तैलेन ॥

1848 The affix mayaṭ (मय with feminine in ङीप्) comes after a Numeral in denoting a thing given in exchange in the sense of "containing so many times more of something" or "the price of a portion of this is so many equal portions of the other".

The word गुणस्य from V 2 36 should be read in this The sense of the aphorism is "after a Numeral in the first case in construction (तद्) with the force of a genitive (अस्य), comes the affix मयट्, when the word in the first case in construction denotes the value (निमान) of a portion (गुण) The word गुण means भाग or "portion", and निमान means 'price'. In comparing the quality of one thing with another, निमान is the value or price Thus यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य = द्विमयमुदश्विद्यवानाम् 'two parts of Yava is the price of one part of Udaśvit". Similarly त्रिमयम्, चतुर्मयम्, lit. "Udaśvit is द्विमय or 'two times' the value of Yava".

Note —The word गुणस्य is in the singular number The comparison must therefore, be made with one portion of a thing, with the several portions of the other The ratio must be $x : 1$, but never $x : 2$, or $x : 3$ &c *Therefore* the rule does not apply here, द्वौ भागौ यवानां त्रय उदश्वितः ॥ The x also must be more than one The rule therefore does not apply here एको भागो निमानमस्य ॥

The word गुण denotes an integral number, therefore the rule will not apply to fraction As द्वौ भागौ यवानामध्यर्धमुदश्वितः ॥

The affix also comes in the sense of purchasing or the comparative value of a thing, i e in denoting the thing received in exchange (निमेय) As उदश्वितो द्वौ भागौ निमानमस्य यवभागस्य = द्विमया, as द्विमया यवा उदश्वितः as 'उदश्वितो द्वौ गुणौ निमेयौ येषामेकगुणानां यवानां the exchange value of Udaśvita is twice as much as that of a Yava' The word निमान means the thing *given* in exchange, and निमेय the thing *received* in exchange Both words are reciprocal and are terms of barter or exchange, but they do not apply to sales or purchases for coins

Why do we say गुणस्य 'of a portion'? Observe द्वौ व्रीहियवौ निमानमस्योदश्वितः ॥ Here being no comparison of ratios, there is no affixing

Why do we say निमाने "in denoting the thing given in exchange"? Observe द्वौ गुणौ क्षीरस्य एकस्तैलस्य = द्विगुणं पच्यते तैलं क्षीरेण 'one part of oil cooks or absorbs as much as two parts of milk' Here the sense is that of 'cooking' and not of purchasing

Note —In short मयट् has the meaning of 'time or fold'. As द्विमय "two time", the word qualifying sometime the निमान sometime the निमेय, e g द्विमयमुदश्वित् यवानां 'Udaśvit is two times or two-fold of Yava in value', or द्विमया यवा उदश्वितः 'two-times Yava are equal to one Udaśvit'

१८४९ । तस्य पूरणे डट् । ५ । २ । ४८ ॥

एकादशानां पूरण एकादशः ॥

1849 The affix ḍaṭ (अ, causing the elision of the last vowel with the consonant following it) comes after a Numeral in the sixth case in construction, when the sense is "making full this number".

That by which a thing is completed is called पूरण ॥ Thus एकादशानां पूरणः = एकादशः the "eleventh" (i. e. the one which, added to ten, completes the eleven).

Note :—By this affix, ordinals are formed. The rule therefore, does not apply to a case like this :—पञ्चानां मुष्टिकानां पूरणो घटः ॥

१८५० । नान्तादसंख्यादेर्मट् । ५ । २ । ४९ ॥

डटो मडागमः स्यात् । पञ्चानां पूरणः पञ्चमः । नान्तात्किम् । विंशः । असंख्यादेः किम् । एकादशः ॥

1850. The augment maṭ (म) comes before डट्, in the above sense, after a Numeral which ends in न्, when no other Numeral precedes it.

Thus पञ्चमः 'fifth' (the completer of the five). Why do we say 'ending in न्' Observe विंशतेः पूरणः = विंशः 'twentieth'. Why do we say 'not preceded by a Numeral'? Observe एकादशानां पूरणः = एकादशः ॥

१८५१ । षट्कतिकतिपयचतुरां थुक् । ५ । २ । ५१ ॥

एषां थुगागमः स्याड्डटि । षण्णां पूरणः षष्ठः । कतिथः । कतिपयशब्दस्यासंख्यात्वेऽप्यत एव ज्ञापकाड्डट् । कतिपयथः । चतुर्थः ॥ चतुरश्छयतावाद्यक्षरलोपश्च * ॥ तुरीयः । तुर्यः ॥

1851. When ḍaṭ follows, थुक् is the augment of the words shaṭ, kati ; katipaya and chatur.

The डट् is to be read into this sûtra, and it should be changed into locative, as डटि 'when ḍaṭ follows'. The word कतिपय is not a Numeral, it takes डट् by force of this sûtra. Thus षण्णां पूरणो = षष्ठः 'sixth'. कतिथः 'the which in order'? कतिपयथः 'the one in order after several', चतुर्थः 'the fourth'.

Vart :—The affixes छ (ईय) and यत् come after चतुर् and there is elision of the first letter. As तुरीयः or तुर्यः ॥

Note :—In this and the two following sûtras, the action of the ट् of डट् vanishes when an augment is added.

१८५२ । बहुपूगगणसङ्घस्य तिथुक् । ५ । २ । ५२ ॥

डटीत्येव । पूगसङ्घयोरसंख्यात्वेऽप्यत एव डट् । बहुतिथः । इत्यादि ॥

1852. When ḍaṭ follows, तिथुक् is the augment of the words bahu, pûga, gaṇa, and saṅgha.

The word डटि is understood here also. The words पूग and संघ are not Numerals ; they take the affix डट् by virtue of this sûtra. Thus बहूनां पूरणो = बहुतिथः, पूगतिथः, गणतिथः, and संघतिथः &c.

१८५३ । वतोरिथुक् । ५ । २ । ५३ ॥

डटीत्येव । यावतिथः ॥

1853. When daṭ follows, इथुक् is the augment of a stem ending in vatu

The word डटि is understood here also The words ending in वतु are Numerals (I 1 23 S 258) and they will take डट् by V. 2 48, the present sûtra declares the augment. Thus यावतां पूरणो = यावतिथ ॥

१८५४ । द्वेस्तीयः । ५ । २ । ५४ ॥

डटोऽपवादः । द्वयो पूरणो द्वितीय ॥

1854. The affix तीय comes in the sense of 'completer thereof', after the word dvi.

This debars डट् ॥ Thus द्वयो पूरणो = द्वितीय 'the second'—that which completes the two

१८५५ । त्रेः सम्प्रसारणं च । ५ । २ । ५५ ॥

तृतीय ॥

1855. The affix tîya comes in the sense of 'completer thereof,' after the word tri; and there is samprasâraṇa (vocalisation) of the stem

The substitution of a vowel for a semi vowel is samprasâraṇa (I 1. 45) Thus त्रि + तीय = त् + ऋ + तीय = तृतीय (VI 1. 108, the इ of त्रि assumes the *form of the prior letter ऋ which is substituted for र्)*

Note — In तृतीय the ऋ is not lengthened by VI 4 2 because that rule applies to the lengthening of the अण् letters only, this word being read into VI. 4 2, by anuvṛitti from VI 3 111 S 174 The pratyâhâra अण् is formed by the first ण् and means the letters अ इ and उ ॥

१८५६ । विंशत्यादिभ्यस्तमडन्यतरस्याम् । ५ । २ । ५६ ॥

एभ्यो डटस्तमडागमो वा स्यात् । विंशतितम । विंश । एकविंशतितम एकविंश ॥

1856 After the words vimśati &c, tamaṭ (तम with fem. in ङीप्) is optionally the augment of daṭ.

This rule falling under the jurisdiction of पूरण we must read the word डट् into this sûtra, as the affix to which the augment तमट् is added Thus विंशते पूरण = विंशतितम or विंश 'twentieth' एकविंशतितम or एकविंश ; त्रिंशत्तम or त्रिंश त्रिंशत्तम or त्रिंश एकत्रिंशत्तम or एकत्रिंश ॥

Note 1—In the case of मट् and तमट् there will be no difference whatever whether we take them as affixes or as augments Thus पञ्चन् + मट् = पञ्च् + मट् (VI 4. 144) = पञ्चम ॥

१८५७ । नित्यं शतादिमासार्धमाससंवत्सराच्च । ५ । २ । ५७ ॥

शतस्य पूरण शततम । एकशततम । मासादेरेव डट् । मासतम ॥

1857. Always after the words śata &c, and after mâsa, ardha-mâsa and sam-vatsar, tamaṭ is the augment of ḍaṭ.

The words शतादय are numerals. The words मास &c. are not numerals; they would not have taken डट् but by the implication of this sûtra. Thus शतस्य पूरणः शततमः 'hundredth; सहस्रतमः। Similarly मासस्य पूरणः = मासतमोदिवसः the last day of the month; अर्द्धमासतमः। संवत्सरतमः ॥

Note:—By the next sûtra the words शत &c, would have taken तमट्; but the scope of that sûtra is confined to numerals not preceded by another numeral. There is no such restriction here. Hence we have एकशततमः। द्विशततमः ॥

१८५८। षष्ठ्यादेश्चाऽसंख्यादेः। ५। २। ५८॥

षष्टितमः। संख्यादेस्तु विंशत्यादिभ्य इति विकल्प एव। एकषष्टः। एकषष्टितमः॥

1158. After the words shashhṭi &c. when no other Numeral precedes them; tamaṭ is always the augment of ḍaṭ.

By sûtra V. 2. 56, the augment was optional, this makes it compulsory. Thus षष्टितमः

Why do we say "when not preceded by a Numeral"? Observe एकषष्टः एकषष्टितमः, एकशततमः or एकसप्ततितमः ॥ Here V, 2. 56. S. 1856 applies also.

१८५९। मतौ छः सूक्तसाम्नोः। ५। २। ५९॥

मत्वर्थे छः स्यात्। अच्छावाकशब्दोऽस्मिन्नस्ति अच्छावाकीयं सूक्तम्। वारवन्तीयं साम॥

1859. When a Sûkta or a Sâman is to be expressed, the affix Chha (ईय) comes after a prâtipadika (nominal-stem), in the sense of the affix matup (V. 2. 94).

The word मतौ means 'in the sense of मतुप् affix.' The sense of मतुप् is "whose is it or in whom it is". Thus अच्छावाक् शब्दोऽस्मिन् = अच्छावाकीयम् सूक्तम्। मित्रावरुणीयम् साम, वारवन्तीयम् साम ॥

Note:—The affix comes after a collocation of words, अस्यवामीयं 'the Sûkta containing the words अस्य वाम' e. g. Rig Veda Mandala 1. sûkta 164. Here the words अस्य वामस्य are considered as a Nominal Stem. So also कयाशुभीयम् ॥

१८६०। अध्यायानुवाकयोर्लुक्। ५। २। ६०॥

मत्वर्थस्य छस्य। अत एव ज्ञापकाच्छ्र छः। विधानसामर्थ्याच्च विकल्पेन लुक्। गर्दभाण्डः। गर्दभाण्डीयः ॥

1860. When an Adhyâya or an Anuvâka is to be expressed, there is (optionally) luk-elision of the affix Chha having the above sense of matup.

This sûtra indicates by implication (ज्ञापक), that the affix ■ con after a nominal stem, to denote an Adhyâya or an Anuvâka According Pâtanjali the elision is optional, by the very fact of the rule enunciat the elision ■f the affix According ■ Kaiyyata, as this sûtra is not plac in the section of matup affixes which was the proper place for it from enunciation here we can infer that the elision is optional Thus गर्दभाण्ड शब्दं स्मिन्नस्ति = गर्दभाण्डोऽध्याय अनुवाकोवा ॥ In the alternative, गर्दभाण्डीय ॥

१८६१ । विमुक्तादिभ्योऽण् । ५ । २ । ६१ ॥

मत्वर्थेऽण् स्यादध्यायानुवाकयो । विमुक्त शब्दोऽस्मिन्नस्ति वैमुक्त । दैवासुर ॥

1861 The affix an comes in the sense of matu when an Adhyâya or an Anuvâka is to be expressed aft the words vimukta &c.

Thus विमुक्त शब्दोऽस्मिन्नस्ति = वैमुक्तोऽध्यायोऽनुवाको वा ॥ So also दैवासुर

1 विमुक्त 2 देवासुर 3 रक्षोऽसुर 4 उपसद् 5 सुवर्ण (सुपर्ण) 6 परिसारक (परिसारक) सदसत् 8 वसु 9 मरुत् मरुत्वत् 10 पत्नीवत् 11 वसुमत् 12 महीयत्व (महीयल) 13 सत्वत् बर्हवत्* 15 दशार्ण 16 दशाह 17 वयस् (दशार्हवयस्) 18 हविर्धान 19 पतत्रिन् (पतत्रि) महित्री 21 अस्यहत्य 22 सोमापूषन् 23 इडा 24 अग्नाविष्णु (विष्णु), 25 उर्वशी, 26 वृत्र (वृत्रहति) 27 मित्री 28 सोम 29 हेतु ॥

१८६२ । गोषदादिभ्यो वुन् । ५ । २ । ६२ ॥

मत्वर्थेऽध्यायानुवाकयो । गोषदक । इषेत्वक ॥

1862 After the nominal stems goshada &c, the is the affix vun (अक) in the sense of matup, when an Adhyây or an Anuvâka is to be expressed

Thus गोषदशब्दोऽस्मिन्नस्ति = गोषदकोऽध्यायोऽनुवाको वा ॥ इषेत्वक, मातरिश्वका

Another reading is गोषद the final consonant being mute

1 गोषद् (गोषद) 2 इषेत्वा (त्वा) 3 मातरिश्वन् 4 देवस्यत्वा 5 देवीराप 6 कृष्णोऽस्याखरेष्ठ दीप 7 देवी (दैवी) धिय धिया (धियम्) 8 रक्षोहण 9 युञ्जान 10 अञ्जन 11 प्रभूत 12 प्र 13 कृशानु (दशाम), 14 सहस्रशीर्षा 15 वाजस्य ते 16 कृपानय 17 स्वाहामाया 18 मत्स्य (?)

१८६३ । तत्र कुशल पथ । ५ । २ । ६३ ॥

वुन् स्यात् । पथि कुशल पथक ॥

1863. The affix vun comes, after the word pathi being in the seventh case in costruction, when the sense "versed therein or skilled therein"

Thus पथि कुशल = पथक, (पथिन्+वुन् = पथ्+वुन् VI 4 144 = पथ्+अ VII 1 1)

१८६४ । आकर्षादिभ्यः कन् । ५ । २ । ६४ ॥

आकर्षे कुशल आकर्षकः । आकषादिभ्य इति रेफरहितो सुपयः पाठः । आकषो निकषोपलः ॥

1864. The affix kan (क) comes in the sense of 'versed therein, skilled therein', after the nominal stems âkarsha &c, being in the seventh case in construction.

Thus, आकर्षेकुशलः = आकर्षकः, त्सरुकः । The best texts have आकष: (Bohtlingk)

1 आकर्ष (आकष), 2 त्सरु, 3 पिशाच (पिपासा), 4 पिचण्ड, 5 अशनि, 6 अश्मन्, 7 निचय (चिचय ।), 8 चय 9 विजय, 10 जय, 11 आचय, 12 नय 13 पाद (निपाद), 14 दीप, 15 ह्रद, 16 ह्राद, 17 ह्लाद, 18 गद्गद, 19 शकुनि, 20 अय, ॥

१८६५ । धनहिरण्यात्कामे । ५ । २ । ६५ ॥

काम इच्छा । धने कामो धनको देवदत्तस्य । हिरण्यकः ॥

1865. The affix kan comes, after the words dhana and hiranya, being in 7th case in construction, in the sense of 'a desire thereafter.'

The word काम means 'desire, wish'. Thus धने कामः = धनको देवदत्तस्य ॥ So also हिरण्यकाः ॥

१८६६ । स्वाङ्गेभ्यः प्रसिते । ५ । २ । ६६ ॥

केशेषु प्रसितः केशकः । तद्रचनायां तत्पर इत्यर्थः ॥

1866. The affix kan comes after a word denoting a part of one's body, in the sense of 'who takes care of it, who bestows care upon it.'

The words तत्र and कन् are understood in this sûtra. The word प्रसित means 'devoted to, intent upon, craving after'. Thus केशेषु प्रसितः = केशकः i. e. केशविन्यासनायां प्रसक्त एवमुच्यते ॥

Note;—The स्वाङ्गेभ्यः is in the plural number, indicating that the affix comes even after a collective compound of Svânga terms. Thus दन्तौष्ठकः, केशनखकः ॥ See, II. 3. 44.

१८६७ । उदराट्ठगाद्यूने । ५ । २ । ६७ ॥

अविजिगीषो ठक् स्यात् । कनोऽपवादः । बुभुक्षयात्यन्तपीडितः उदरे प्रसित औदरिकः । आद्यूने किम् । उदरकः । उदरपरिमार्जनादौ प्रसक्त इत्यर्थः ॥

1867. The affix ṭhan (इक) comes in the sense of 'voracious' after the word udara.

This debars the affix कन ॥

Adyûna = not desiring to conquer; उत्कर्षेच्छारहितः see VIII. 2. 49. S. 3028 for the formation of this word from the root div.

Note —The translation given above is according to Dr Bohtlingk According to the Kāsikā the anuvritti of प्रसित is also read into this sūtra The meaning then would be 'thak comes after the word udara in the seventh case in construction, in the sense of 'who is devoted therein, when the word so formed means voracious'

A person who is very much distressed by hunger is so called, उदरसि अतितुभेन्यम I Thus उदरे प्रसित = औदरिकः (i e. आद्यूनः)

Why do we say when it means 'voracious'? Observe उदरकः 'abdominal'

१८६८ । सस्येन परिजात । ५ । २ । ६८ ॥

कन् स्यात् न तु ठक् । सस्यशब्दो गुणवाची न तु धान्यवाची । शस्येनेति पाठान्तरम् । सस्येन परिजात सस्यक साधु ॥

1868 The affix kan (क) comes after the word sasya being in the third case in construction, when the sense is "to supply richly with it".

The anuvritti of कन्, not of ठक्, is to be read here The word सस्य means good quality' and not 'corn', Another reading is शस्य The word परि means 'all, every where' That which is full of (परिजात) good qualities (सस्य) in which there is no defect that is the signification here Thus सस्येन परिजात = सस्यक शालि 'a rice, above all praise', सस्यक साधु 'a good man, not equalled by any

१८६९ । अंशं हारी । ५ । २ । ६९ ॥

हारीत्यावश्यके णिनिः । अत एव सयोग षष्ठी न । अंशको दायाद ॥

1869. The affix kan comes after the word ansa 'a share' in the second case in construction, the sense being 'who must take that'

The word अंश is used in the accusative in the aphorism showing that the construction must be accusative The word हारिन्, nom हारी is *formed by adding णिनि to the root हृ the force of the affix being* that of "must, or necessity" See III 3 170 S 3311 The word हारिन् will govern accusative and not genitive (II 3 70 S 628)

Thus अंश हारी = अंशक 'an heir, i e who is entitled to take a share in partition I e a दायाद । अंशक पुत्र ॥

१८७० । तन्त्रादचिरापहृते । ५ । २ । ७० ॥

तन्त्रक पट । प्रत्यग्र इत्यर्थ ॥

1870 The affix Kan comes after the word tantra 'a loom or a shuttle,' in the sense of "taken off therefrom not long ago or shortly before"

The word तन्त्र must be in the fifth case in construction, by the very fact of its being so employed in the sûtra. The word अचिर means 'short time, not long' अपहृत means "taken off". Thus तन्त्रादचिरापहृतः = तन्त्रकः 'a cloth just taken off the loom or from which the shuttle has just been taken off.' i. e. an unbleached cloth. As तन्त्रकः पटः, तन्त्रकः प्रावारः 'a new mantle' = प्रत्यग्रः or नवः ॥

१८७१ । ब्राह्मणकोष्णिके संज्ञायाम् । ५ । २ । ७१ ॥

आयुधजीविनो ब्राह्मणा यस्मिन्देशे स ब्राह्मणकः । अल्पमन्नं यस्यां सा उष्णिका यवागूः । अन्नशब्दस्य उष्णादेशो निपात्यते ॥

1871. The words Brâhmaṇaka and ushṇika are anomalous, when they are Names.

Thus ब्राह्मणको देशः, उष्णिका यवागूः ॥ The affix कन् is added to ब्राह्मण, with the force of 'a place where Brâhmaṇas who live by the profession of arms dwell'. Similarly उष्णिका means अल्पान्ना ॥ The word अन्न is replaced by उष्ण by virtue of this sûtra.

१८७२ । शीतोष्णाभ्यां कारिणि । ५ । २ । ७२ ॥

शीतं करोतीति शीतकोऽलसः । उष्णं करोतीति उष्णकः शीघ्रकारी ॥

1872. The affix kan comes after the words śita and ushṇa, in the sense of 'who goes to work thus'.

The words शीत and उष्ण being used as adverbs will be in accusative construction. As शीतं करोति 'who goes to work coldly' i. e. a lazy man = शीतकः = अलसः, जडः ॥ Similarly उष्णकः = शीघ्रकारी, दक्षः 'who goes to work hotly'.

१८७३ । अधिकम् । ५ । २ । ७३ ॥

अध्यारूढशब्दात्कन् उत्तरपदलोपश्च ॥

1873. The word adhika is anomalous.

The word अधिकः meaning 'more', is formed by adding कन् to the word अध्यारूढ; there being elision of the second term before the affix. Thus अधिको द्रोणः खार्याम् or अधिको द्रोणः खार्याः "a Droṇa is superior to Khârî" अधिका खारी द्रोणेन "a Khârî is inferior to Droṇa". The word अध्यारूढ governs nominative or accusative indifferently.

Note :—Thus अध्यारूढो द्रोणः खारीं ॥ Similarly अधिक would have governed the accusative also. But Pâṇini uses the ablative and locative after adhika, as in II. 3. 9. S. 645 and V. 2. 45. S. 1846 and thus we learn that it governs the ablative and locative. This is the case when adhyârûḍha is an active participle. But when it is a passive participle, as it may also be by III. 4. 72. S. 3086, then as the participle denotes the object, it will take the first case in construction. In that case, there will not be the ablative or the locative.

१८७४। अनुकाभिकाभीकः कमिता ।५।२।७४॥

अन्वभिभ्यां कन् । अभेः पाक्षिको दीर्घः । अनुकामयते अनुकः । अभिकामयते अभिकः । अभीकः ॥

1874. The words anuka, abhika and abhika are anomalously formed by adding कन् to anu and abhi, the meaning 'being at liberty to do or being fond of'.

Thus अनुकामयते = अनुक 'desirous, libidinous'. अभिकामयते = अभिक or अभीक 'a lover, voluptuous person'. These are formed by adding कन् to अनु and अभि ॥ In one case the short इ of abhi is lengthened.

१८७५। पार्श्वेनान्विच्छति ।५।२।७५॥

अनृजुरुपायः पार्श्वं तेनान्विच्छति पार्श्वकः ॥

1875 The affix kan comes after the word pārśva, in the third-case in construction, signifying "who strives to gain something by that".

The word पार्श्वम् means 'a fraudulent or crooked expedient'. One who endeavours to obtain anything by fraud is called पार्श्वक 'a cheat, a juggler, a partisan'. पार्श्व = a rib, a crooked thing; as पार्श्वक = मायाविन्, कौसृतिक, जालिक, &c.

१८७६। अयःशूलदण्डाजिनाभ्यां ठक्ठञौ ।५।२।७६॥

तीक्ष्ण उपायोऽयःशूलं तेनान्विच्छति आयःशूलिकः । साहसिकः । दण्डाजिनं दम्भः, तेनान्विच्छति दाण्डाजिनिकः ॥

1876. The affixes ṭhak and ṭhañ come respectively after ayaḥśūla and daṇḍājina, in the same sense of "who strives to gain something by that".

The word अन्विच्छति is understood here also. The word अयः शूल means 'a violent proceeding'. Who seeks to obtain anything by violent means is called आयः शूलिक = साहसिक ॥ The word दण्डाजिन् means 'staff (daṇḍa) and hide (ajina)' i. e. outer badges of devotion or hypocrisy. Who seeks to gain something by hypocrisy and deceit is called दाण्डाजिनिक = दाम्भिक ॥

१८७७। तावतिथं ग्रहणमिति लुग्वा ।५।२।७७॥

कन् स्यात्पूरणप्रत्ययस्य च लुग्वा । द्विकं द्वितीयकं वा ग्रहणं देवदत्तस्य । द्वितीयेन रूपेण ग्रहणमित्यर्थः । तावतिथेन गृह्णातीति कन्वक्तव्यो नित्यं च लुक् ॥ षष्ठेन रूपेण गृह्णाति षट्को देवदत्तः । पञ्चकः ॥

1877. The affix kan is added to an ordinal number, in the sense of "acquiring a subject after so many attempts";

and there is optionally the elision of the affix denoting the ordinal number.

The word तावतिथं (V. 2. 53 S. 1853) stands here as a type of all words ending in affixes denoting पूरण i. e. ordinals. The word ग्रहण means 'acquired or learned hereby'. This qualifies the base. Thus द्वितीयेन रूपेण ग्रन्थं गृह्णाति = द्विकं ग्रहणम् or द्वितीयकं ग्रहणम् 'the acquisition of the knowledge or book by the second time' i. e. "successful mastery by the second time". So also त्रिकं or त्रितीयकम्, चतुष्कम् or चतुर्थकम् ॥

Vârt:—When the word, formed by the affix kan, means the *person* who acquires after so many times, then the elision of the पूरण affix is compulsory and not optional. Thus षष्ठेन रूपेण ग्रन्थं गृह्णाति = षट्को देवदत्तः 'Devadatta who learns the book for the sixth time' i. e. 'who succeeds in learning the book at the sixth attempt'. Similarly पंचकः, चतुष्कः ॥ [The word ग्रहण here is confined to books only and to nothing else.

१८७८ । स एषां ग्रामणीः । ५ । २ । ७८ ॥

देवदत्तो ह्यग्रणी येषां ते देवदत्तकाः । त्वत्काः । मत्काः ॥

1878. The affix kan comes after a word in the first case in construction, with the force of a genitive case, when the sense is "he is their leader".

The word ग्रामणी means 'head-man, leader, spokes-man'. Thus देवदत्तो ह्यग्रणीऽस्य = देवदत्तकः ॥ So also त्वत्कः and मत्कः ॥

Vârt :—So also after अर्थ when meaning 'not near'; as अर्थिन् meaning अर्थोऽसंनिहितोऽस्य 'wanting wealth'. Otherwise अर्थवान् 'having wealth'.

Vârt :—So also after a compound ending in अर्थ, as धान्यार्थी, हिरण्यार्थी ॥

1 पुष्कर, 2 पद्म, 3 उत्पल, 4 तमाल, 5 कुमुद, 6 नड, 7 कपित्थ, 8 बिस, 9 मृणाल, 10 कर्दम, 11 शालूक, 12 विगर्ह, 13 करीष, 14 शिरीष, 15 यवास, 16 प्रवाह (प्रवास), 17 हिरण्य, 18 कैरव, 19 कल्लोल, 20 तट*, 21 तरंग, 22 पङ्कज*, 23 सरोज*, 24 राजीव*, 25 नालीक*, 26 सरोरुह*, 27 पुटक, 28 अरविन्द*, 29 अम्भोज*, 30 अब्ज*, 31 कमल*, 32 पयस्*, 33 पयस ॥

१९४२ । बलादिभ्यो मतुबन्यतरस्याम् । ५ । २ । १३६ ॥

बलवान् । बली । उत्साहवान् । उत्साही ॥

1942 After the nominal-stems bala &c, comes the affix matup optionally, as well as ini

The affix इनि will come in the alternative Thus बलवान् or बली (Nom of बलिन्), उत्साहवान् or उत्साही (Nom of उत्साहिन्) ॥

1 बल 2 उत्साह 3 उद्भास (उदास), 4 उद्वास*, 5 उदास 6 शिखा*, 7 कुल, 8 चूड 9 सुल* 10 कूल*, 11 आयाम 12 व्यायाम 13 उपयाम, 14 आरोह 15 अवरोह, 16 परिणाह 17 युद्ध, 18 उद्दाम 19 शिखावल 20 मूलमूल, 21 बल ॥

१९४३ । संज्ञायां मन्माभ्याम् । ५ । २ । १३७ ॥

मन्नन्तान्मान्ताच्चेनिर्मत्वर्थे । प्रथिमिनी । दामिनी । होमिनी । सोमिनी । संज्ञायां किम् । सोमवान् ॥

1943 After a nominal-stem ending in मन् or म comes the affix ini, in the sense of matup, when the whole word so formed means a name

Thus प्रथिमन् + इनि = प्रथिम + इन् (VI 4 144 S 679) = प्रथिमिन् fem प्रथिमिनी So also दामिनी ॥ Similarly होम, होमिनी साम सामिनी ॥ Why do we say, 'when meaning a name'? Observe, सोमवान् ॥

१९४४ । कंशंभ्यां बभयुस्तितुतयसः । ५ । २ । १३८ ॥

कमिति मान्तौ । कमितुदकसुखयोः । शमिति सुखे । आभ्यां सप्त प्रत्ययाः स्युः । युसस् सकारः पदत्वार्थः । कंव । कंभ । कंयु । कंति । कंतु । कंत । कंय । शंव । शंभ । शंयु । शंति । शंतु । शंत । शंय । अनुस्वारस्य वैकल्पिकः परसवर्णः । यकारवकारपरस्यानुनासिको यवौ ॥

1944 The seven affixes va, bha, yus, ti, tu, ta and yas, come in the sense of matup, after कम् 'water and happiness', and शम् 'happiness'

Thus कंव, कंभ कंयु, कन्ति कन्तु कन्त, कंय, शंव शंभ शंयु शन्ति, शन्तु शन्त शंय ॥

The स् in युस् and यस्, make the stem a Pada (I 4 16 S 1252), the result of which is that म of कम् and शम् is changed into Anusvâra before these two affixes by VIII 3 23 S 122 When denoting a Name the forms will be कंय and शंय The anusvâra is optionally changed to nasal homogeneous to the class that follows The va and ya become nasalised when preceded by an anusvâra (Thus the first affix व va and not भ ba as given in the Kâsikâ)

१९४५ । तुन्दिवलिवटेर्भः । ५ । २ । १३९ ॥

वृद्धा नाभिस्तुन्दि । मूर्धन्योपधोऽयमिति माधवः । तुन्दिभः वलिभः । वटिभः । पामादिपाठादि मोऽपि ॥

1945. The affix bha (भ) comes in the sense of 'pride' matup, after tundi, vali and vaṭi.

Thus तुन्दिभः 'having a protuberent belly'. वलिभः and वटिभः ॥ Another form is वलिनः, because वलि is included in the Pâmâdi class V. 2. 100. S. 1907. The forms तुन्दिलः &c, are valid by V. 2. 117 S. 1924.

१९४६ । अहंशुभमोर्युस् । ५ । २ । १४० ॥

अहमिति मान्तमव्ययमहङ्कारे । शुभमिति शुभे । अहंयुः अहङ्कारवान् ॥ शुभंयुः शुभान्वितः ॥

1946. The affix yus (युस्) comes in the sense of matup, after the words aham 'pride', and the indeclinable ubham 'good'.

Thus अहंयुः = अहंकारवान्, 'selfish, haughty', शुभंयुः = कल्याणवान् ॥ 'auspicious'. The स् of युस् makes the words अहम् and शुभम्, Padas; and म is changed into Anusvâra (I. 4. 16; VIII. 3. 23). See V. 2. 123.

Here ends the chapter on Matup-affixes.

:o:

अथ तद्धित प्राग्दिशीय प्रकरणम् ॥

CHAPTER XXXVII.

THE VIBHAKTI AFFIXES

१९४७। प्राग्दिशो विभक्तिः। ५। ३। १॥

दिक्शब्देभ्य इत्यत प्राग्वक्ष्यमाणा प्रत्यया विभक्तिसंज्ञा स्युः॥ अथ स्वार्थिका प्रत्यया॥ समर्थानामिति प्रथमादिति च निवृत्तम्। वाक्ये स्वरूपवर्तत एव॥

1947. The affixes taught from this aphorism forward as far as V. 3 27 S 1974 (exclusive) are called Vibhakti.

The affixes herein taught do not change the sense of the word, i e they are स्वार्थ affixes which leave to the word their own denotation The rule IV 1 82 S 1072 extends no further than this, hence the words formed by these affixes do not produce epithets connoting the sense of the primitive and denoting something else.

The affixes now to be taught being स्वार्थिक, the anuvritti of समर्थानाम् and प्रथमात् of IV 1 82 S 1072 does not apply to them The word वा of IV 1 82 S 1072 however applies here so that these affixes are optional, thus we may have कुत or कस्मात्, कुत्र or कस्मिन्॥

Note —Thus V 3 7 S 1953 declares, that after the words किम् in the ablative there is the affix तसिल्, as कुत ततः यत ॥

Note —The purpose served by designating these affixes as Vibhakti is (a) to debar the elision of final स् and म् of the affixes as इत् (I 3 4 S 190). Thus in the affix थाल् V 3 18 S 1967 म् is not इत् had it been so rule I 1 47 would have applied (b) to regulate the accent of इदम्, thus इदम्+तसिल्=इतः here by VI 1 171 S 3717 the affix तसिल् becomes udâtta by virtue of its being Vibhakti, otherwise the accent would have been regulated by the indicatory ल (VI 1 193 S 3676) (c) to make applicable to these words the rules of त्यदादि that is, the rules given in the Sûtras VII 2 102 S 265 and those that follow Thus यद्+तसिल्=यतः, the द् being replaced by अ by VII 2 102 S 265

१९४८। किंसर्वनामबहुभ्योऽद्व्यादिभ्यः। ५। ३। २॥

किम सर्वनाम्नो बहुशब्दाच्च प्राग्दिशोऽधिक्रियन्त॥

1948 These Prâgdiśîya affixes come after the word kim, and after a stem called sarvanâma, and after bahu, but not after dvi &c

The words द्वि &c. though सर्वनाम are exempted. Thus कुत्र, कुतः, यतः, यत्र, बहुतः, बहुत्र ॥

Note :—Why do we say अद्व्यादि 'not dvi &c. Observe द्वाभ्याम्, द्वयोः ॥ Why do we say किम् &c.? Observe वृक्षात्, वृक्षे &c. The word किम् is a सर्वनाम, but it being included in the dvyâdi class, would have been exempted from the operation of this rule had it not been separately mentioned.

Note :—The word बहु here is 'a Saṅkhyâ.' Therefore, the affix does not apply here, बहोः सूपात्, बहौ सूपे ॥

१९४९ । इदम इश् । ५ । ३ । ३ ।

प्राग्दिशीये परे ॥

1949. For idam, there is the substitute इश् (इ), when a Prâgdiśîya affix follows.

The word प्राग्दिशः is understood here also. The श् of इश् is indicatory of the substitution of the whole (I. 1. 55). Thus इदम्+ह V. 3. 11,=इह ॥

१९५० । एतेतौ रथोः । ५ । ३ । ४ ॥

इदम् शब्दस्य एत इत इत्यादेशौ स्तो रेफादौ थकारादौ च प्राग्दिशीये परे । इशोऽपवादः ॥

1950. The substitutes एत and इत come in the place of idam, when 'a Prâgdiśîya affix beginning with र and थ respectively follows.

This debars इश् ॥ The अ in र is for the sake of euphony. Thus इदम्+र्हिल्=एतर्हि (V. 3. 16). इदम्+थमु=इत्थम् (V. 3. 24).

१९५१ । एतदोऽन् । ५ । ३ । ५ ॥

योगविभागः कर्तव्यः ॥ एतदः ॥ एतेतौ स्तो रथोः ॥ अन् ॥ एतद इत्येव । अनेकाल्त्वात्सर्वादेशः । सलोपः प्रातिपदिकान्तस्य ॥

1951. The substitute अन् comes in the place एतद् when a Prâgdiśîya affix follows.

Note :—According to Kâśikâ the substitute is अश् । The ■ of अश् causes the replacement of the whole (I. 1. 55. S.45). According to Patanjali the substitute is अन् and not अश् ॥ Thus एतद्+तसिल्=अतः V. 3. 7. S. 1953; अत्र V, 3. 10.

This sûtra must be divided into two, (1) एतदः, and (2) अन्, the meaning being. (1) The substitutes एत and इत् come in the place of एतद् when affixes beginning with र् and थ respectively follow, as एतद्+र्हिल=एतर्हि (V. 3. 21. S. 1969) एतद्+थमु=इत्थम ॥ The थ must be the थ of थमु which comes after idam (V. 3. 24. S. 1972) for the application of this rule (1), and not the थ of थाल (V. 3. 23 S. 1971) before which the substitute will be अश् ॥ The word एतद् will take थमु by the implication of this rule. The substitute अन् replaces एतद् before other Prâgdiśîya affixes As the substitute consists of more than

one letter, it replaces the whole of etad Thus एतद्+तसिल् = एत्+तस् = अत (the त is elided by VIII 2 7 S 236)

१९५२ । सर्वस्य सोऽन्यतरस्यां दि । ५ । ३ । ६ ॥

प्राग्दिशीयो दकारादौ प्रत्यये परे सर्वस्य सो वा स्यात् ॥

1952 The स is substituted optionally for सर्व before a prâgdiśîya vibhakti beginning with द ॥

Thus सर्वदा or सदा ॥ When the affix is not Prâgdiśîya, there is no substitution as, सर्वं ददाति = सर्वदा ब्राह्मणी 'a Brâhmanî who gives all'

१९५३ । पञ्चम्यास्तसिल् । ५ । ३ । ७ ॥

पञ्चम्यन्तेभ्यः किमादिभ्यस्तसिल् स्यात् ॥

1953 The affix tasil (तस्) comes after the word, किम् a sarvanâma, and bahu, when ending in the ablative case but not after dvi &c

As किम्+तसिल् = कु+तस् ॥ The following sutra changes किम् into कु ॥

१९५४ । कु तिहोः । ७ । २ । १०४ ॥

किमः कुः स्यात्तादौ हादौ च विभक्तौ परतः । कुतः । कस्मात् । यतः । ततः । अतः । इतः । अमुतः । बहुतः । द्व्यादेस्तु । द्वाभ्याम् ॥

1954 कु is substituted for किम् before a vibhakti affix beginning with a त or a ह ॥

Thus कुतः = कस्मात् ॥ कुत्र कुह (V 3 13, 7 S 1961 and 1953) The त in ति means beginning with a त ॥ So also यतः, ततः, अतः, इतः, अमुतः, बहुतः ॥ But not after द्वि &c. As द्वाभ्याम् ॥

१९५५ । तसेश्च । ५ । ३ । ८ ॥

किंसर्वनामबहुभ्यः परस्य तसेस्तसिलादेशः स्यात् । स्वरार्थं विभक्त्यर्थं च वचनम् ॥

1955 The affix tasil (तस्) is substituted for तस् (V 4 44, 45 S 2111 and 1221) when kim, a sarvanâma, and bahu follow

This substitution is for the sake of accent, and for giving it the designation of vibhakti Otherwise तस् (V 4 44) being taught subsequently and it not being a Prâgdiśîya affix, it does not get the name of vibhakti and so यत् &c cannot be changed to य when तसि will be added (VII 2 102 S 265). So we can never get the form यतः as in the sentence यतोऽगच्छति ॥

१९५६ । पर्यभिभ्यां च । ५ । ३ । ९ ॥

आभ्यां तसिल् स्यात् ॥ सर्वोभयार्थाभ्यामेव । परितः । सर्वत इत्यर्थः । अभितः । उभयत इत्यर्थः ॥

1956 The affix tasil comes after pari and abhi also.

Vârt:—This affix comes when परि means 'all'; and अभि means 'both. Thus परितः = सर्वतः; 'all round'; अभितः, उभयतः 'on both sides'.

१९५७ । सप्तम्यास्त्रल् । ५ । ३ । १० ॥

कुत्र । यत्र । तत्र । बहुत्र ॥

1957. The affix tral (त्र) comes after kim, a sarvanâma, and bahu, when ending in a locative.

Thus कुत्र (VII. 2. 104 S, 1954) 'where', तत्र (VII. 2. 102, S. 265) 'there', बहुत्र 'in many places'.

१९५८ । इदमो हः । ५ । ३ । ११ ॥

त्रलोऽपवादः । इशादेशः । इह ॥

1958. The affix ह comes after इदम् ending in the locative.

This debars त्रल ॥ Thus [illegible] (V. 3. 3. S. 1949) 'here'.

१९५९ । किमोऽत् । ५ । ३ । १२ ॥

वाग्रहणमपकृष्यते । सप्तम्यन्तात्किमोऽद्वा स्यात्पक्षे त्रल् ॥

1959. The affix अत (अ) comes optionally after kim ending in the locative, as also the affix tral.

We must draw forward the word वा 'optionally' from the sûtra after the next. So that this sûtra is an optional one. Thus किम्+अत् ॥ Now applies the next sûtra by which किम् is replaced by क्व ॥ In the other alternative त्रल् also comes, as कुत्र ॥

१९६० । क्वाति । ७ । २ । १०५ ॥

किमः क्वादेशः स्यादति । क्व । कुत्र ॥

1960. क्व is substituted for किम् before the vibhakti अत् (V. 3. 13).

As क्व । So also कुत्र ॥

Note:—The substitute कु of VII. 2. 104. S. 1954, before the affix अ would have become को, but it would have caused guṇa, hence this separate substitute. Had the sûtra been किमोऽद्वल् it would not have included the साकच् augmented किम् ॥

१९६१ । वा ह च च्छन्दसि । ५ । ३ । १३ ॥

कुह स्थः । कुह जग्मथुः ॥

1961. Optionally the affix ह also comes in the Chhandas, after the word kim in the locative: as well as the other affixes.

As in the Rig Veda VIII. 62. 4: कुहस्थ कुहजग्मथु कुहं श्येनेव पेतथुः ॥ 'Where are ye two? Where are you going? Where do you fall like eagles"?

१९६२। एतदस्त्रतसोस्त्रतसौ चानुदात्तौ । २ । ४ । ३३ ॥

अन्वादेशविषये एतदोऽश् स्यात् स चानुदात्तस्त्रतसौ परतः तौ चानुदात्तौ स्तः । एतस्मिन् ग्रामे सुखं वसामः । अथोऽत्राधीमहे । मर्मा न मन्तारः स्म ॥

1962. In the room of एतद् in case of its re-employment there is the substitution of the gravely accented अश् when the affixes त्र (V. 3. 10. S. 1957) and तस् (V. 3. 7 S. 1959) follow, and the affixes त्र and तस् are anudâtta also (gravely accented).

Thus अत्र 'here', and अतस् 'hence', in the following :—एतस्मिन् ग्रामे सुखं वसामः ; अथो अत्र अधीमहे । 'We live in this (etasmin) village happily, therefore let us read with full devotion in this (atra)' एतस्माच्छात्राच्छन्दोऽधीष्व, अथो अतः व्याकरणमप्यधीष्व । 'Learn from this student Prosody and also learn from his Grammar'. By rule V. 3 5. S 1951 अश् is declared to be the substitute of एतद् ; its repetition here is to indicate that the अश् of anvâdeśa is anudâtta.

१९६३ । इतराभ्योऽपि दृश्यन्ते । ५ । ३ । १४ ॥

पञ्चमीसप्तमीतरविभक्त्यन्तादपि तसिलादयो दृश्यन्ते । दृशिग्रहणाद्भवदादियोग एव । स भवान् ततो भवान् । तत्र भवान् । तं भवन्तम् । ततो भवन्तम् । तत्र भवन्तम् । एवं दीर्घायुः । देवानांप्रिय आयुष्मान् ॥

1963. The above affixes are seen coming after kim a sarvanama and bahu, ending with other case-affixes also besides the locative and ablative.

That is to say, the affixes तसिल्, त्रल्, ह &c come after kim &c which are not in the ablative or the locative case. By the employment of the expression 'are seen', it is hinted that this may take place not on every occasion, but only when in juxtaposition with such words as भवत् 'Your Honor' दीर्घायुः 'long-lived', आयुष्मान् 'having long life', and देवानांप्रियः 'the beloved of the Gods'. Thus :

Nom ततो भवान् or तत्र भवान् = स भवान् ॥
Acc. तत्र भवन्तम् or ततो भवन्तम् = तं भवन्तम् ॥
Ins तत्र भवता or ततो भवता = तेन भवता ॥
Dat ततो भवते or तत्र भवते = तस्मै भवते ॥
Abl ततो भवतः or तत्र भवतः = तस्मात् भवतः ॥
Gen ततो भवतः or तत्र भवतः = तस्य भवतः ॥
Loc ततो भवति or तत्र भवति = तस्मिन् भवति ॥

Similarly with the words दीर्घायुः, आयुष्मान् and देवानां प्रिय ॥

१९६४ । सर्वैकान्यकियत्तदः काले दा । ५ । ३ । १५ ॥

सप्तम्यन्तेभ्यः कालार्थेभ्यः स्वार्थे दा स्यात् । सर्वस्मिन्काले सदा । सर्वदा । एकदा । अन्यदा । कदा । यदा । तदा । काले किम् । सर्वत्र देशे ॥

1964. After sarva 'all', eka 'one', anya 'other', kim 'what', yad 'which', and tad 'that', when time is denoted, comes the affix दा, the words being in the locative case.

The word सप्तम्याः V. 2. 10 S. 1957 is understood here and not the word इदमाद्यां of the last. This debars त्रल् ॥ Thus सर्वदा or सदा (V. 3. 6 S. 1952) 'at every time' or 'always', एकदा 'once', अन्यदा 'at another time', कदा (VII. 2. 103 S. 342) 'when', यदा 'when', तदा 'then'.

Why do we say काले 'when time is denoted'? Observe सर्वत्रदेशे where although the case is the 7th, the affix is not दा, because the sense is 'in every *place*' or 'every where'.

१९६५ । इदमोर्हिल् । ५ । ३ । १६ ॥

सप्तम्यन्तात्काले इत्येव । हस्यापवादः । अस्मिन्काले एतर्हि । काले किम् । इह देशे ॥

1965. After idam 'this', ending in the locative case, comes the affix rhil र्हि when time is denoted.

The words सप्तम्याः and काले are understood. This rhil debars ha: The ल् of र्हिल् is for accent. Thus अस्मिन् काले = एतर्हि (V. 3. 4 S. 1950) 'at this time'. Why 'when time is denoted'? Observe, इह 'in this *place*', इह देशे ॥ See V. 3. 4 S. 1950

१९६६ । अधुना । ५ । ३ । १७ ॥

इदमः सप्तम्यन्तात्कालवाचिनः स्वार्थेऽधुनाप्रत्ययः स्यात् । इश् । यस्येति लोपः । अधुना ॥

1966. After idam ending in the locative case, con the affix अधुना, when time is denoted.

Thus इदम् + अधुना = इ + अधुना (V. 3. 3 S. 1949) = ० + अधुना (S. 311) = अधुना ॥ According to Kâsikâ अस्मिन् काले = अधुना 'at this time', अश् is substituted for इदम् and, धुन affix is added.

१९६७ । दानीं च । ५ । ३ । १८ ॥

इदानीम् ॥

1967. The affix dânîm also comes after idam, ending in the locative, and denoting time.

Thus अस्मिन् काले = इदानीम् (V. 3. 3 S. 1949) 'at this time'.

१९६८ । तदो दा च । ५ । ३ । १९ ॥

तदा । तदानीम् । तदो दावचनमनर्थकं विहितत्वात् ॥

1968 After tad, ending in the seventh case, when time is denoted, comes the affix दा, and also dânîm

The दानीम् is read into the sûtra by force of the word च 'also' Thus तस्मिन् काले = तदा or तदानीम् 'at that time' *Vârt* —This sûtra, so far as it ordains दा after तद् is useless, because the word तद् already takes [illegible] by V 3 15

१९६९ । अनद्यतने र्हिलन्यतरस्याम् । ५ । ३ । २१ ॥

कर्हि । कदा । यर्हि । यदा । तर्हि । तदा । एतस्मिन्काले एतर्हि ॥

1969 The affix rhil comes optionally, in denoting time not of the current day, after the words 'kim' the sarvanâma, and bahu &c' in the 7th case

The anuvritti of कुत्सिते is not read into this sûtra This is a general rule Thus कर्हि or कदा, (VII 2 103 S 342) यर्हि or यदा, तर्हि or तदा एतर्हि ॥

१९७० । सद्यः परुत्परार्यैषमः परेद्यव्यद्य पूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः । ५ । ३ । २२ ॥

एते निपात्यन्ते । समानस्य सभावो द्यश्चाहनि* । समानेऽहनि सद्यः । पूर्वपूर्वतरयोः परभाव उदारी च प्रत्ययौ संवत्सरे* । पूर्वस्मिन्वत्सरे परुत् । पूर्वतरे वत्सरे परारि ॥ इदम इश् समसण् प्रत्ययश्च संवत्सरे* । अस्मिन्संवत्सरे ऐषमः । परस्मादेद्यव्यहनि* । परस्मिन्नहनि परेद्यवि । इदमोऽश् द्यश्च* । अस्मिन्नहनि अद्य । पूर्वान्यान्यतरेतरापराधरोभयोत्तरेभ्य एद्युस्* । पूर्वस्मिन्नहनि पूर्वेद्युः । अन्यस्मिन्नहनि अन्येद्युः । उभयाद्द्युश्च ॥ उभयद्युः ॥

1970 The following words are anomalous, sadyah, parut, parâri, aishamas, paredyavi, adya, pûrvedyus, anyedyus, anyataredyus, itaredyus, aparedyus, adharedyus, ubhayedyus, and uttaredyus

The words सप्तम्या and काल are understood here The base, the substitute, the affix the particular time &c, must all be deduced from these forms *Vârt* —सद्य is formed from समान by substituting स for समान and adding द्यस्, in the sense of 'a day' समानेऽहनि = सद्यः 'the same day' *Vârt* —The पूर्व and पूर्वतर are replaced by पर and then उत् and आरि are added, in the sense of 'a year' Thus पूर्वस्मिन् संवत्सरे = परुत् 'last year' पूर्वतरे वत्सरे = परारि 'the year before last' *Vârt* —The इश् replaces इदम् and समसण् is added, in the sense of 'year' अस्मिन् संवत्सरे = ऐषमः 'during this year' *Vârt* —To पर is added एद्यवि in the sense of 'a day' as [illegible] = परेद्यवि 'the other day' *Vârt* —The अश् replaces इदम् and द्यस् is added in the sense of 'a day' Thus अस्मिन्नहनि = अद्य 'to day' *Vârt* —To पूर्व अन्य, अन्यतर इतर अपर, अधर,

उभय and उत्तर is added the affix एद्युस्, in the sense of 'a day': as पूर्वस्मिन्नहनि = पूर्वेद्युस् 'on the day before', अन्यस्मिन्नहनि = अन्येद्युस् 'on the following day'. अन्यतरस्मिन्नहनि = अन्यतरेद्युः 'on either of two days'. इतरस्मिन्नहनि = इतरेद्युः 'on another day', अपरस्मिन्नहनि = अपरेद्युः on the following day' अधरस्मिन्नहनि = अधरेद्युः : 'on a previous day' उभयोरह्नो = उभयेद्युः 'on both days'. *Vârt*:—So also उभयद्युः is formed by dyus added to ubhaya.

१९७१ । प्रकारवचने थाल् । ५ । ३ । २३ ॥

प्रकारवृत्तिभ्यः किमादिभ्यस्थाल्स्यात्स्वार्थे । तेन प्रकारेण तथा । यथा ॥

1971. The affix thâl (था) comes, after the words kim &c V. 3. 2, when we speak of a kind or manner of being.

The sûtra V. 3. 2, S. 1948 is to be read into this. The anuvritti of सप्तम्याः and काले ceases. The word प्रकार means the differentiating quality distinguishing a species among the genus: it means 'sort', 'kind', 'mode', 'manner,' &c. 'Thus तेन प्रकारेण = तथा 'so, in that manner'. Similarly यथा ॥

Note:—The affix जातीयर् taught in V 3. [illegible] S. 2024 has also the same force, with this difference that jâtîyar applies to words which denote things possessing such [illegible] quality (प्रकारवान्) while thâl denotes mode itself. Therefore, one does not debar the other, [illegible] that we have forms like तथाजातीयः, and यथाजातीयः ॥

१९७२ । इदमस्थमुः । ५ । ३ । २४ ॥

थालोऽपवादः ॥ एतदोऽपि वाच्यः * ॥ अनेन एतेन वा प्रकारेण इत्थम् ॥

1972. After idam comes the affix thamu (थमु) in the same sense i. e. in denoting manner.

Vârt:—It comes after etad also. This debars थाल्; thus:—अनेन or एतेन प्रकारेण = इत्थम् V. 3. 4, S. 1950 'in this manner.' The उ in थमु protects the म from becoming इत् (See I. 3. 4 S. 190).

१९७३ । किमश्च । ५ । ३ । २५ ॥

केन प्रकारेण कथम् ॥

1973. Also after kim, comes the affix thamu in the sense of manner.

Thus केन प्रकारेण = कथम् 'how?'.

Here ends the chapter on Prâgdiśîya affixes.

अथ तद्धितप्रागिवीय प्रकरणम् ॥

CHAPTER XXXVIII.

THE SVÂRTHIKA AFFIXES.

१९७४ । दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः । ५ । ३ । २७ ॥

सप्तम्याद्यन्तेभ्यो दिशि रूढेभ्यो दिग्देशकालवृत्तिभ्यः स्वार्थेऽस्तातिप्रत्ययः स्यात् ॥

1974. After words which primarily denote 'direction' ending in the locative, ablative and nominative, and referring to 'direction', 'locality' or 'time', comes the affix astâti (अस्ताति) without change of sense.

Note —The word दिक् शब्द means 'words denoting directions' Thus पुरस्तात्, has all these three significations in the following sentences, पुरस्ताद्वसति 'he lives eastward', पुरस्तादागत 'he came from east' पुरस्ताद् रमणीयम् 'It was delightful previously'. Similarly with अधस्तात् ॥ For further explanation see S 1977 below.

१९७५ । पूर्वाधरावराणामसि पुरधवश्चैषाम् । ५ । ३ । ३९ ॥

एभ्योऽस्तात्यर्थेऽसिप्रत्ययः स्यात्तद्योगे चैषां क्रमात्पुर्, अध्, अव्, इत्यादेशाः स्युः ॥

1975. After pûrva, adhara and avara comes the affix asi (असि) in the sense of astâti; and pura, adh, and av are their respective substitutes before this affix.

Note —The word सप्तम्यन्त does not govern this sûtra. Thus पुरो वसति, पुर आगत, पुरो रमणीयम् ॥ Similarly अधस् and अवस् with वसति आगत and रमणीयम् ॥ As अधोवसति, अध आगत, अधोरमणीयम्, अवोवसति, अवआगत and अवोरमणीयम् ॥ See S 1984

१९७६ । अस्ताति च । ५ । ३ । ४० ॥

अस्तातौ परे पूर्वादीनां पुरादयः स्युः । पूर्वस्यां पूर्वस्याः पूर्वा वा दिक् । पुरः पुरस्तात् । अधः अधस्तात् । अवः । अवस्तात् ॥

1976. The same substitution takes place when the affix astâti (अस्ताति) follows.

That is पुर for पूर्व, अध् for अधर and अव् for अवर ॥ Thus पुरस्तात् or अधस्तात् or अवस्तात् वसति or आगत or रमणीयम् ॥

१९७७ । विभाषावरस्य । ५ । ३ । ४१ ॥

अवरस्यास्तातौ परेऽव् स्याद्वा । अवस्तात् । अवरस्तात् । एवं देशे काले च । दिशि रूढेभ्यः किम् । ऐन्द्र्यां वसति । सप्तम्याद्यन्तेभ्यः किम् । पूर्वं ग्रामं गतः । दिग्वृत्तिभ्यः किम् । पूर्वस्मिन् गुरौ वसति । अस्ताति चेति ज्ञापकादधिरस्तातिं न बाधते ॥

1977 The substitution of अव् for अवर is optional when astâti follows.

This declares an option when by the last it was compulsory. As अवरस्तात् or अवस्तात् वसति, आगतः, or रमणीयम्॥

Why do we say 'after words which primarily denote direction'? Observe ऐन्द्र्यां दिशि वसति, 'He lives in the Aindrâ direction". Here ऐन्द्री is a secondary word denoting eastern direction. Why do we say 'ending in the locative, ablative and nominative'? Observe पूर्वं ग्रामं गतः ॥ Why do we say when the sense is 'a direction', 'a locality' or a 'time'? Observe पूर्वस्मिन् गुरौ वसति 'he lives in the presence of the Guru'.

Note:—This affix is a स्वार्थिक affix, like the affixes taught previously. The words denoting direction must be primitive words of direction; and not derivative words like ऐन्द्री &c. which also denote direction.

The sûtra 1976 indicates by implication that the affix अस्ताति V. 3. 27 S. 1974 is not debarred by अस् after these words.

१९७८ । दक्षिणोत्तराभ्यामतसुच् । ५ । ३ । २८ ॥

अस्तातेरपवादः । दक्षिणतः । उत्तरतः ॥

1978. After dakshinâ and uttara (referring to a direction or a locality or a time, and ending with the locative, ablative or nominative), comes the affix atasuch. (अतस्) ॥

This debars अस्ताति ॥ Thus दक्षिणतः, उत्तरतः ॥

Note:—The word दक्षिणा can never refer to time, so with regard to it direction and locality are only taken. The च of अतसुच् is for the sake of differentiating this affix from तस् in sûtras like II. 3. 30.

१९७९ । विभाषा परावराभ्याम् । ५ । ३ । २९ ॥

परतः । अवरतः । परस्तात् । अवरस्तात् ।

1979. Optionally after para and avara, comes the affix atasuch, in the sense of astâti.

Thus परतः or परस्तात् ॥ So also अवरस्तात् or अवरतः ॥

१९८० । अञ्चेर्लुक् । ५ । ३ । ३० ॥

अञ्चत्यन्ताद्दिक्शब्दादस्तातेर्लुक् स्यात् । लुक् तद्धितलुकि ॥ प्राच्यां प्राच्याः प्राची वा दिक् प्राक् । उदक् । एवं देशे काले च ॥

1980. After words of direction ending in अञ्च्, there is luk-elision of the affix astâti.

Thus प्राक् or प्रत्यक् as प्राच्यां दिशि वसति = प्राग् वसति, प्रागागत, प्राग्रमणीयम् ॥ The feminine affix of प्राची is also elided, when the taddhita affix is elided by लुक् ॥ See I 2 49 S 1408 So also उदक् 'in the north'. Similarly when locality or time is denoted

१९८१ । उपर्युपरिष्टात् । ५ । ३ । ३१ ॥

अस्तातेर्विषये ऊर्ध्वशब्दस्योपादेशः स्याद्रिल्रिष्टातिलौ च प्रत्ययौ । उपरि उपरिष्टाद् वसति । आगतो रमणीयं वा ॥

1981 The words upari and uparishtât are anomalous in the sense of astâti

These words are derived irregularly from the word ऊर्ध्व, by changing it into उप and adding the affixes रिल् and रिष्टातिल् ॥ Thus ऊर्ध्वायां दिशि वसति = उपरि वसति । So also उपर्यागतः उपरि रमणीयम् ॥ उपरिष्टाद्वसति, उपरिष्टादागत, उपरिष्टाद्रमणीयम् ॥

१९८२ । पश्चात् । ५ । ३ । ३२ ॥

अपरस्य पश्चभाव आतिश्च प्रत्ययोऽस्तातेर्विषये ॥

1982 The word paschât is anomalous, in the sense of astâti

The word is formed by changing अपर into पश्च and adding the affix आति ॥ As अपरस्यां दिशि वसति = पश्चाद्वसति, आगत, रमणीयम् &c

Note —So also when अपर is preceded by another word denoting direction, it is changed into paścha and âti is added. As दक्षिणपश्चात्, उत्तरपश्चात् ॥

Note —So also when अर्ध follows such a compound apara is changed into paścha, as, दक्षिणपश्चार्ध, उत्तरपश्चार्ध ॥

Note —Apara is changed into paścha, when followed by ardha, and not preceded by any other word. As पश्चार्ध ॥

१९८३ । उत्तराधरदक्षिणादातिः । ५ । ३ । ३४ ॥

उत्तरात् । अधरात् । दक्षिणात् ॥

1983 To the words uttara, adhara and dakshina is added the affix âti, in the sense of astâti.

Thus उत्तरस्यां दिशि वसति = उत्तराद्वसति ॥ Similarly अधरात् and दक्षिणात् ॥

१९८४ । एनबन्यतरस्यामदूरेऽपञ्चम्याः । ५ । ३ । ३५ ॥

उत्तरादिभ्य एनब्वा स्यादवध्यवधिमतोः सामीप्ये पञ्चमीं विना । उत्तरेण । अधरेण । दक्षिणेन । पक्षे यथास्वं प्रत्ययाः । इह केचिदुपराधीनूर्ध्वस्य रिल्रिष्टातिलावपवादत्वेनैनपमाहुः । ऊर्ध्वेन ग्रामस्य ॥ अपरेण ग्रामस्य ॥

1984. The affix enap (एन्) comes optionally, (after the words uttara, adhara and dakshiṇa in the sense of astâti), when the limit indicated is not remote, and when it is not a substitute of the ablative case-affix.

Note:—The affix अस्ताति and the other affixes taught above come with the force of locative, ablative and nominative. The एनप् comes with the force of locative and nominative and not that of ablative. The adverbs so formed refer to objects not at a distance.

Thus उत्तरेण or उत्तरात् or उत्तरतो वसति or रमणीयम् ॥ Similarly अधरेण, अधरात् अधस्ताद् वसति &c, so also दक्षिणेन, दक्षिणात्, दक्षिणतो, वसति &c. 'He lives near by in the north-ward or southward'. Why do we say when not denoting distance? In the other alternative the ordinary affixes will come as दक्षिणतः उत्तरतः, अधस्तात्, उत्तरात् । Observe उत्तराद्वसति 'he lives far away in the north'. Why do we say 'when not having the force of ablative'? Observe उत्तरादागतः 'come from the north'.

Note:—The word अपञ्चम्याः governs all the succeeding sûtras upto V. 3. 39, exclusive.

Some do not read उत्तर &c. into this sûtra: according to them this is a general rule applicable to all words denoting direction. As पूर्वेण ग्रामम्, अपरेण ग्रामम् (II. 3. 31) The प् in enap is for the sake of accent (III. 1. 4. S. 3709).

१९८५ । दक्षिणादाच् । ५ । ३ । ३६ ॥

अस्तातिविषये । दक्षिणा वसति । अपञ्चम्या इत्येव । दक्षिणादागतः ॥

1985. The affix ach (आ) comes after the word dakshiṇa, in the sense of astâti, but not as a substitute of the ablative case-affix.

The word अदूरे of the last sûtra is not read into this: though the word अपञ्चम्याः governs it. Thus दक्षिणा वसति or रमणीयम्, but दक्षिणत आगतः in the ablative.

Note:—The च् in आच् is not for the sake of accent (VI. 1. 163. S. 3710) for the simple affix आ would be udâtta by the general rule III 1. 3. S. 3708. The च् serves the purpose of differentiating this आ from other affixes in Sûtra II. 3. 29 S. 595.

१९८६ । आहि च दूरे । ५ । ३ । ३७ ॥

दक्षिणाद् दूरे आहि स्यात् चादाच् । दक्षिणाहि । दक्षिणा ॥

1986. The affix âhi (आहि) comes after the word dakshiṇa, in the sense of astâti, as well as ách, when the reference is to a distant limit.

We draw in the affix आच् by force of the word च 'and'

Thus दक्षिणाहि वसति or दक्षिणा वसति 'he lives far away in the south'

Note —Why do we say दूरे when the adverb denotes a distant limit'? Observe दक्षिणतो वसति ॥ The word अपपञ्चम्याः governs this also as दक्षिणा ग्रामः ॥

१९८७ । उत्तराच्च । ५ । ३ । ३८ ॥

उत्तराहि । उत्तरा ॥

1987. The affixes आच् and आहि come after uttara in the sense of asthti, when the reference is to a distant limit

Thus उत्तरा or उत्तराहि वसति or रमणीयम् ॥ 'He lives far away in the north or the northward far away is pleasant'

Note —But when distance is not meant we have उत्तरेण वसति ॥ The word अपपञ्चम्या governs this also as उत्तरा ग्रामः ॥

१९८८ । संख्याया विधार्थे धा । ५ । ३ । ४२ ॥

क्रियाप्रकारार्थे वर्तमानात्संख्यावाचकात्स्वार्थे धा स्यात् । चतुर्धा । पञ्चधा ॥

1988 The affix dhâ (धा) comes after a nominal-stem denoting a Numeral, when it means the mode or manner of an action

Note —The word विधा and प्रकार have the same meaning Thus adverbs so formed apply to every kind of action

Thus एकधा भुङ्क्ते 'he eats once' द्विधा गच्छति 'he goes twice Similarly त्रिधा चतुर्धा पञ्चधा ॥

१९८९ । अधिकरणविचाले च । ५ । ३ । ४३ ॥

द्रव्यस्य संख्यान्तरापादने संख्याया धा स्यात् । एकं राशिं पञ्चधा कुरु ॥

1989 The affix dhâ comes after a numeral, when the sense is a change in the apportionment or distribution of substances

Note —The word संख्याया is understood here The word अधिकरणम् means 'matter stuff substance' विचाल 'change in numbers' Thus to make one into many, or to make many into one

Thus एकं राशिं पञ्चधा कुरु 'divide one heap into five Similarly अनेकम् एकधा कुरु make these many heaps into one "

१९९० । एकाद्धो ध्यमुञन्यतरस्याम् । ५ । ३ । ४४ ॥

ऐकध्यम् । एकधा ॥

1990. After the word eka, the substitute dhyamuñ (ध्यमुञ्) comes optionally instead of dha.

Thus एकधा राशिं कुरु or ऐकध्यं कुरु; एकधा भुङ्क्ते or ऐकध्यं भुङ्क्ते ॥

Note:—The repetition of धा in the sûtra shows that the substitution takes place when the sense is that of विधा, as well as when it is that of अधिकरण विचाल ॥ Had धा not been repeated, the substitution would have come in the sense of अधिकरण विचाल only, as immediately preceding this sûtra.

१९९१ । द्वित्र्योश्च धमुञ् । ५ । ३ । ४५ ॥

आभ्यां धा इत्यस्य धमुञ् स्याद्वा । द्वैधम् । द्विधा । त्रैधम् । त्रिधा । धमुञन्तात्स्वार्थे डदर्शनम् * ॥ पथि द्वैधानि

1991. The substitute dhamuñ धमुञ् comes optionally, in the place of धा after the words dvi and tri.

Note:—Here also it comes in both the विधार्थ and अधिकरण विचाल senses. By च, the word 'optionally' is drawn into the sûtra.

Thus द्विधा or द्वैधम्, त्रिधा, or त्रैधम् ॥

Vârt:—The affix ड (ḍa, with the elision of the final vowel) comes without changing the sense, after words ending in dhamuñ. As पथि, द्वैधानि संशयन्ते ॥

१९९२ । एधाच्च । ५ । ३ । ४६ ॥

द्वेधा । त्रेधा ॥

1992. The substitute edhâch (एधाच्) comes optionally in the place of dha, after dvi and tri.

Thus द्वेधा (VI. 4. 148 S. 311) or द्वैधम् or द्विधा, त्रेधा त्रैधम् or त्रिधा ॥

१९९३ । याप्ये पाशप् । ५ । ३ । ४७ ॥

कुत्सितो भिषक् भिषक्पाशः ॥

1993. The affix pâśap (पाशप्) denotes something as insignificant.

The word याप्य means 'contempt, trifling' &c. Thus कुत्सितः याप्यो भिषक् भिषक् पाशः 'a very bad physician.' So also याज्ञिकपाशः ॥

Note:—Of course this will not come in denoting a person who is a good physician, but bears a bad character, or who is a good performer of sacrifices but immoral.

१९९४ । पूरणाद्भागे तीयादन् । ५ । ३ । ४८ ॥

द्वितीयो भागो द्वितीयः । तृतीयः । स्वरे विशेषः ॥ तीयादीकक् स्वार्थे वाच्यः * ॥ द्वैतीयीकः । द्वितीयः । तार्तीयीकः तृतीयः ॥ न विद्यायाः * ॥ द्वितीया । तृतीया । विद्येत्येव ॥

1994 : After (a nominal stem being) an ordinal number ending in tiya, comes the affix अन् (अ) (the word retaining its denotation), when a 'part' is meant

This sûtra is made only to teach accent for the word to which अन is added undergoes no other change of form except in accent Thus द्वितीय (V 2 54 S 1854) has udâtta on ती (III 1 3 S 3708) but when अन् is added the accent falls on द्वि (VI 1 197 S 3686) Thus द्वितीयो भाग = द्वितीय: 'the moiety' Similarly तृतीय 'the one third'

Note :—Why do we say when part is meant? Otherwise there is no change in accent The affix तीय always comes in forming ordinal numbers and for no other purpose for the तीय in words like कुलतीय is not significant as it is not an affix The employment of the word पूरण in the aphorism is useless for the purposes of this sûtra Its anuvritti however runs in the other sûtras and that is the only purpose that it serves here

Vârt :—The affix ईकक् is added to words ending in तीय without changing the sense As द्वैतीयीक तार्तीयीक, in the same sense as द्वितीय and तृतीय ॥

Vârt :—But not so when the word ending in तीय refers to विद्या ॥ As द्वितीया विद्या तृतीया विद्या ॥

१९९५ । प्रागेकादशभ्योऽच्छन्दसि । ५ । ३ । ४९ ॥

पूरणप्रत्ययान्तादाप्राग् । चतुर्थ । पञ्चम ॥

1995 After an ordinal numeral upto eleven exclusive, comes the affix अन्, the word retaining its denotation, when a 'part' is meant but not so in the Chhandas

This is for accent also Thus चतुर्थ, पञ्चम सप्तम नवम दशम ॥

Note :—Why do we say प्रागेकादश before eleven? Observe एकादश द्वादश no change of accent (VI 1 2?3 S 3734) Why do we say not in the Chhandas? Observe पञ्चममिन्द्रियस्यापाक्रामत (पञ्चम has acute on the final being formed by डट् preceded by मट् V ? 48 49 S 1849 1850)

4 १९९६ । षष्ठाष्टमाभ्यां ञ च । ५ । ३ । ५० ॥

भागे, षष्ठो भाग षाष्ठ । षष्ठ । आष्टम । अष्टम ॥

1996 The affix ña (अ) also comes as well as अन् after shastha and ashtama, when a 'part' is meant, but not in the Chhandas

The words भागे and अच्छन्दसि are understood here By च the affix अन् is included Thus षाष्ठ or षष्ठ आष्टम or अष्टम ॥

१९९७ । मानपश्वङ्गयोः कन्लुकौ च । ५ । ३ । ५१ ॥

षष्ठाष्टमशब्दाभ्यां क्रमेण कन्लुकौ स्तो माने पश्वङ्गे च वाच्ये । षष्ठको भागः माने चेत् । अष्टमो भागः पश्वङ्गं चेत् । अस्य ञनो वा लुक् । चकारादयथासंख्यम् । षष्ठः । षाष्ठः । अष्टमः । आष्टमः । महाविभाषया सिद्धे लुग्वचनं पूर्वत्र ञानौ नित्याविति ज्ञापयति ॥

1997. After the words shashtha and ashtama there may come respectively कन् (क) and लुक elision of the affix, when the meaning is a division of a measure called mâna or grain, or the part of the body of a beast respectively.

The word मान means a grain weight (व्रीहि परिमितं सुवर्णं) ॥ That is to say, कन् comes after षष्ठ when a division of मान 'measure' is expressed; and लुक् comes after अष्ट when a part of पश्वङ्ग is denoted. Thus षष्ठको भागः 'a sixth of a grain measure'. अष्टमो भागः 'an-eighth part of the body of a beast'. The लुक् here takes the place of the affix ञ as well as अन् ॥ By च, the affixes above mentioned are also employed: as षाष्ठः or षष्ठः, आष्टमः or अष्टम ॥ When a measure or the body of an animal is not denoted, this rule (though optional) will not apply.

Though under the Great Option (IV. 1. 82. S. 1092) all these affixes may be elided, yet the separate luk elision herein taught indicates by implication, that the ञ and अन् of the preceding aphorism are compulsory and cannot be elided by the Great Option. See also V. 3. 1. S. 1947.

१९९८ । एकादाकिनिच्चासहाये । ५ । ३ । ५२ ॥

चात्कन्लुकौ । एकः । एकाकी । एककः ॥

1998. After the word eka, comes also the affix âkinich (आकिनिच्), (the word retaining its denotation), when the sense is 'without a companion'.

By the word च, the affix कन् and the elision लुक् also take effect: the elision being of कन् or आकिनिच् ॥ Thus एकाकिन् (nom एकाकी), एककः or एकः ॥

Note:—By using असहाय, it is indicated that the word एक here is not a numeral meaning 'one', but a noun meaning 'alone'. एकोऽन्यार्थे प्रधाने च, प्रथमे, केवले, तथा ॥ साधारणे, समाने ऽल्पे, संख्यायां च प्रयुज्यते ॥ So that this word will have dual एकाकिनौ, and the plural एकाकिनः ॥

१९९९ । भूतपूर्वे चरट् । ५ । ३ । ५३ ॥

आढ्यो भूतपूर्वः आढ्यचरः ॥

1999. The affix चरट् (with the feminine in ङीप्) comes after a nominal stem, the word retaining its denotation, when the meaning is 'this had been before'.

The word भूतपूर्व is a compound of पूर्व and भूत, the compounding being by सुप्सुपा, and denotes something done in a past time. Thus आढ्यो भूतपूर्वः = आढ्यचरः 'once opulent'.

Note.—The ट् indicates that the feminine will be in ङीप् as आढ्यचरी. The च् is not इत् in चरट् though required by I. 3. 7. S. 189. This proves that चुटू rule is anitya. The sutra V. 2. 18. S. 1819 might have been read after this with the saving of the word भूतपूर्वे, but then खञ् would have debarred चरट् which is however not intended.

२००० । षष्ठ्या रूप्य च । ५ । ३ । ५४ ॥

षष्ठ्यन्ताद्भूतपूर्वेऽर्थे रूप्यः स्याच्चरट् च । कृष्णस्य भूतपूर्वो गौः कृष्णरूप्यः । कृष्णचरः । तसिलादिषु रूप्यस्यापरिगणितत्वान्न पुंवत् । शुभाया भूतपूर्वः शुभारूप्यः ॥

2000. After a nominal-stem ending in the sixth-case, comes the affix रूप्य, and also चरट्, in the sense of 'having belonged formerly to somebody.'

The word भूतपूर्व here qualifies the sense of the affix, and not the sense of the base, as it was in the last sutra. Thus कृष्णस्य भूतपूर्वो गौः = कृष्णरूप्यः, 'the cow that formerly belonged to *Krishna*.' Similarly देवदत्तचरः ॥ The affix रूप्य not being included in tasiládi class of sutra VI. 3. 35 S. 836 does not cause the masculisation. Thus शुभायाः भूतपूर्वः = शुभारूप्य and not शुभरूप्य ॥

२००१ । अतिशायने तमबिष्ठनौ । ५ । ३ । ५५ ॥

अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः । अयमेषामतिशयेनाढ्य आढ्यतमः । लघुतमो लघिष्ठः ॥

2001. When the sense is that of surpassing, there come the affixes तमप् (तम) and इष्ठन् (इष्ठ), after a nominal stem, the word retaining its denotation.

Note.—These affixes form the superlative degree. The word अतिशायन is an irregular form of अतिशयन and it qualifies the sense of the primitive. The स्वार्थिक affixes sometimes qualify the sense of the primitive.

Thus आढ्यतम = सर्वे इमे आढ्याः अयमेषामतिशयेनाढ्यः 'the richest' i. e. these are all rich but he surpasses them all in riches. Similarly पटु—पटिष्ठ, गुरु—गरिष्ठ, लघु—लघिष्ठ (VI. 4. 155 S. 1786)

Note.—When among superlatives further excellence is indicated then these words may take additional affixes also: as श्रेष्ठ though a superlative, forms श्रेष्ठतम ॥ As देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे । युधिष्ठिरः श्रेष्ठतमः कुरूणामिति ॥

२००२ । तिङश्च । ५ । ३ । ५६ ॥

तिङन्तादतिशये द्योत्ये तमप् स्यात् ॥

2002. So also after a finite verb, comes the affix tamap, when 'surpassing' is meant.

By the next sûtra, the affix तमप् gets the designation *gha* घ ॥

Note:—By ङ्याप्प्रातिपदिकात् IV. 1. 1. S. 182 whose force runs throughout, the taddhita affixes are ordained only after nominal stem; they would not have come after verbs; hence this sûtra. Thus पचतितमाम् (the आम् is added by V. 4. 11, S. 2004) = सर्व इमे पचन्तीति, अयमेषामतिशयेन पचति, 'he cooks surprisingly'. जल्पतितमाम् &c. The affix इष्ठन् never comes after a verb, as by V. 3. 58. S. 2006 it is restricted to adjectives.

२००३ । तरप्तमपौ घः । १ । १ । २२ ॥

एतौ घसंज्ञौ स्तः ॥

2003. The affixes tarap and tamap are called घ ॥

As this affix is gha, the next sûtra applies.

२००४ । किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे । ५ । ४ । ११ ॥

किम एदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुः स्यान्न तु द्रव्यप्रकर्षे । किंतमाम् । प्राह्णेतमाम् । पचतितमाम् । उच्चैस्तमाम् । द्रव्यप्रकर्षे तु उच्चैस्तमस्तरुः ॥

2004. To the affix तर and तम (घ I. 1. 22. S. 2003) ordained to come after the word किम् (V. 3. 55. S. 2001) or after a word ending in ए (VI. 3. 17. S. 975) or after a finite verb (V. 3. 56. 57. S. 2002) or after an indeclinable, is added the affix âm (आम्), but not if the excess belongs to a substance (and not to an action or quality).

Note:—The घ or तरप् and तमप् affixes are employed for comparison (प्रकर्ष 'excess') of adjectives and adverbs. This rule applies to adverbs and not to adjectives: i. e. when an adverb qualifies a verb or another adjective, but not when an adjective qualifies a noun. The द्रव्य denoting word by itself has no 'excess' &c, it is the adjective which qualifies such substance that is capable of excess or comparison. The prohibition in अद्रव्यप्रकर्ष therefore really relates to the *quality* of a substance; i. e. to adjectives. द्रव्यस्याव्यपदेश्यस्य [illegible] विना भेद हेतुना । प्रकर्षो विद्यते नापि शब्दस्योपेति वाच्यताम् ॥

Thus किंतराम् or किंतमाम् "how excessively", प्राह्णेतराम् or प्राह्णेतमाम्, पचतितराम् or पचतितमाम् "he cooks surprisingly", उच्चैस्तराम्, उच्चैस्तमाम् "more or most loftily or loudly".

But when the excess belongs not to an action or attribute, but to a substance, the âm आम् is not added. As उच्चैस्तमः तरुः "a most lofty tree".

२००५ । द्विवचनविभज्योपपदे तरबीयसुनौ । ५ । ३ । ५७ ॥

द्वयोरेकस्य निर्धारणे विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः । पूर्वयोरपवादः । अयमनयोरतिशयेन लघुर्लघुतरः लघीयान् । उदीच्याः प्राच्येभ्यः पटुतराः । पटीयांसः ॥

2005 The affixes tarap (तरप्) and iyasun (ईयसुन्) come in the sense of 'surpassing', after a nominal stem or a finite-verb, when it expresses (comparison between) two things, or when that which is added to it (upapada), is to be distinguished from another.

Note —The word द्विवचन does not mean dual, but means an expression for two. विभज्य is irregularly formed by भज् and means 'that which is to be distinguished or differentiated'.

This debars तमप् and इष्ठन् ॥

The rule of यथासंख्य (I 3 10 S 123) does not apply here. First to take an example of द्विवचन or when comparison is between two things thus द्वाविमावाढ्यौ अयमनयोरतिशयेनाढ्यः = आढ्यतरः 'both are rich but he is *richer* amongst the two'. So also लघुतरः and लघीयान् ॥

Similarly सुकुमारतरः पचतितराम् जल्पतितराम् (V 4 11 S 2004) or with ईयसुन् as द्वाविमौ पटू अयमनयोरतिशयेन पटुः = पटीयान् more skilful of the two, पटीयान् ॥ Secondly to take an example of विभज्ये चोपपदे i. e. when a word in construction is to be differentiated thus माथुराः पाटलिपुत्रकेभ्य आढ्यतराः 'The men of Mathura are richer than those of Pataliputra'. Here there are more than two things but as the words are expressed in the sentence, the comparative degree in plural number is used.

Similarly so also उदीच्याः प्राच्येभ्यः पटुतराः 'The northerns are more skilful than the easterns'. पटीयांसः लघीयांसः ॥ Of course all these words must be plural, as they refer to more than two persons.

२००६ । अजादी गुणवचनादेव । ५ । ३ । ५८ ॥

इष्ठन्नीयसुनौ गुणवचनादेव स्तः । लघिष्ठः । लघीयान् । नेह । पाचकतरः । पाचकतमः ॥

2006 The two affixes beginning with a vowel (i. e. ईयसुन् and इष्ठ) are added only after words denoting attributes.

Thus लघिष्ठ लघीयान्, but not after words like पाचक &c. there we have पाचकतरः पाचकतमः ॥

Note :—The word एव 'only' restricts the scope of the *affixes*, and not of the *primitives*. Thus पटुतर, पटुतम are also valid forms.

२००७ । तुश्छन्दसि । ५ । ३ । ५९ ॥

तृन्तृजन्तादिष्ठनीयसुनौ स्तः ॥

2007 These affixes ishthan and iyasun come in the Chhandas after a nominal stem ending in तृ ॥

The तु is ablative of तृ which includes both तृन् and तृच् ॥ This extends the application of these affixes to words other than attributes.

२००८ । तुरिष्ठेमेयःसु । ६ । ४ । १५४ ॥

तृणाब्दस्य लोपः स्यादिष्ठेमेयःसु परेषु । अतिशयेन कर्ता करिष्ठः । दोहीयसी धेनुः ॥

2008. The affix तृ is elided before the affixes इष्ठन्, इमनिच् and ईयसुन् ॥

Thus करिष्ठः, विजयिष्ठः, वहिष्ठः, दोहीयसी धेनुः ॥ The whole affix तृ is elided, otherwise only the last vowel (ऋ) with the following consonant would have been elided by the following rules.

Thus अतिशयेन कर्ता = करिष्ठः (कर्तृ + इष्ठन् = कर् = इष्ठ by VI. 4. 154, S. 2008 तृ is elided). As भासुरिते करिष्ठ, दोहीयसी धेनुः ॥ By the Vârtika under VI, 3. 35 S. 836 दोग्ध्री is changed into masculine दोहितृ and then ईयस् is added by VI. 4. 145. S. 2008).

२००९ । प्रशस्यस्य श्रः । ५ । ३ । ६० ॥

अस्य श्रादेशः स्यादजाद्योः ॥

2009. For प्रशस्य is substituted श्र, when these affixes ishṭhan and îyasun follow.

Then applies the following.

२०१० । प्रकृत्यैकाच् । ६ । ४ । १६३ ॥

इष्ठादिष्वेकाच् प्रकृत्या स्यात् । श्रेष्ठः । श्रेयान् ॥

2010. A monosyllabic bha stem retains its original form, without undergoing any change, before the affixes इष्ठ, इमन् and ईयस् ॥

Thus श्रेष्ठः and श्रेयान् ॥

२०११ । ज्य च । ५ । ३ । ६१ ॥

प्रशस्यस्य ज्यादेशः स्यादिष्ठेयसोः । ज्येष्ठः ॥

2011. For prasasya, ज्य is also substituted before these two affixes.

As ज्येष्ठः ॥

२०१२ । ज्यादादीयसः । ६ । ४ । १६० ॥

आदेः परस्य । ज्यायान् ॥

2012. आ is substituted for the first letter of ईयस् after ज्य ॥

As ज्यायान् ॥

Note :—ज्य is substituted for प्रशस्य by V. 3. 61, S. 2011.

२०१३ । वृद्धस्य च ।५।३।६२॥

ज्यादेशः स्यादजाद्योः । ज्येष्ठः । ज्यायान् ॥

2013. ज्य is also substituted for वृद्ध, when ishṭhan and iyas follow.

Thus ज्येष्ठ 'the oldest', ज्यायान् 'the older'.

Note:—By VI. 4, 157, S 2016 वर्षि is also substituted for वृद्ध and we have वर्षिष्ठः and वर्षीयान् also. The word वृद्ध though not a guṇavachana, takes these affixes by the implication of this sūtra.

२०१४ । अन्तिकबाढयोर्नेदसाधौ ।५।३।६३॥

अजाद्योः । नेदिष्ठः । नेदीयान् । साधिष्ठः । साधीयान् ॥

2014. For अन्तिकः is substituted नेद, and for बाढ is साध, when these affixes follow.

Thus नेदिष्ठ । नेदीयान् । साधिष्ठ and साधीयान् ॥

२०१५ । स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः ।६।४।१५६॥

एषां यणादिपरं लुप्यते पूर्वस्य च गुण इष्ठादिषु । स्थविष्ठः । दविष्ठः । यविष्ठः । ह्रसिष्ठः । क्षेपिष्ठः । क्षोदिष्ठ । एवमीयसुन् । ह्रस्वक्षिप्रक्षुद्राणां पृथ्वादित्वात् ह्रसिमा । क्षेपिमा । क्षोदिमा ॥

2015. Before the affixes इष्ठ, इमन् and ईयसु, is elided the last semi-vowel with that which follows it, and for the first vowel, a Guṇa is substituted, in स्थूल, दूर, युवन्, ह्रस्व, क्षिप्र and क्षुद्र ॥

That is ल, र, वन् and व and र are elided. Thus स्थविष्ठ, स्थवीयान्; दविष्ठः दवीयान्; यविष्ठः, यवीयान्; ह्रसिष्ठः, ह्रसीयान्, ह्रसिमा; क्षेपिष्ठः क्षेपीयान्, क्षेपिमा ॥ The words ह्रस्व, क्षिप्र and क्षुद्र are read in Pṛithvādi class and take 'Iman' affix (V. i 122 S. 1784). क्षोदिष्ठ, क्षोदीयान्, क्षोदिमा ॥ Why do we say पर in यणादिपरं 'the *last* semivowel'? The *first* semivowel of युवन् and ह्रस्व i. e. य of यु and र of ह्र should not be elided. The word पूर्व is employed for the sake of distinctness.

२०१६ । प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः ।६।४।१५७॥

प्रियादीनां क्रमात्प्रादयः स्युरिष्ठादिषु । प्रेष्ठः । स्थेष्ठः । स्फेष्ठः । वरिष्ठ । बंहिष्ठः । गरिष्ठ । वर्षिष्ठ । त्रपिष्ठ । द्राघिष्ठ । वृन्दिष्ठ । एवमीयसुन् । प्रेयान् । प्रियोरुबहुलगुरुदीर्घाणां पृथ्वादित्वात्प्रेमेत्यादि ॥

2016. Before the affixes इष्ठ, इमन् and ईयसु the following substitutions take place :—प्र for प्रिय, स्थ for स्थिर, स्फ for स्फिर, वर् for उरु, बंह् for बहुल, गर् for गुरु, वर्ष् for वृद्ध, त्रप् for तृप्र, द्राघ् for दीर्घ, and वृन्द् for वृन्दारक ॥

Thus प्रेष्ठः, प्रेमा, प्रेयान् ; स्थिर, स्थेष्ठः, स्थेयान् , स्थेमा ; स्फिर, स्फेष्ठः, स्फेयान् ; उरु, वरिष्ठः वरिमा वरीयान् ; बहुल, बंहिष्ठः, बंहीयान् बंहिमा ; गुरु गरिष्ठः, गरीयान् गरिमा ; वृद्ध, वर्षिष्ठः वर्षीयान् ; तृप, त्रपिष्ठः, त्रपीयान् ; दीर्घ, द्राघिष्ठः, द्राघीयान्, द्राघिमा ; वृन्दारक, वृन्दिष्ठः, वृन्दीयान् ; ॥

Of the above, priya, uru, guru and bahula are read in the Prithvâdi class and take इमन् (V. 1. 122. S. 1784.) while others do not.

२०१७ । बहोर्लोपो भू च बहोः । ६ । ४ । १५८ ॥

बहोः परयोरिमेयसोर्लोपः स्याद्बहोश्च भूरादेशः । भूमा । भूयान् ॥

2017. The इ and ई of these affixes (इमन् and ईयस्) are elided after बहु ; and for बहु is substituted भू ॥

Thus भूयान् , भूमा ॥

Note:—In the case of इष्ठ, the following sûtra 2018 will apply. Under I. 1. 54. and 67. बहोः being in the Ablative, the first letter of the succeeding term is elided, viz. इ or ई ; in this case बहु belongs to the Prithvâdi class and takes इमन् affix. V. 1. 122. S. 1784. The repetition of बहोः is for the sake of pointing out the sthânî, for which the word भू is to be substituted : otherwise भू would have replaced these affixes.

२०१८ । इष्ठस्य यिट् च । ६ । ४ । १५९ ॥

बहोः परस्य इष्ठस्य लोपः स्यात् यिडागमश्च । भूयिष्ठः ॥

2018. After बहु the augment यिट् is added to इष्ठ, and भू replaces बहु ॥

As भूयिष्ठः ॥

Note:—This augment यिट् debars the lopa substitution of the last sûtra in the case of इष्ठ ॥ The इ in यिट् is for the sake of pronunciation, the augment being य् ॥ Or इष्ठ may be taken to have lost its इ by the foregoing sûtra, and to the ष्ठ the augment [illegible] may be added.

२०१९ । युवाल्पयोः कनन्यतरस्याम् । ५ । ३ । ६४ ॥

एतयोः कनादेशो वा स्यादिष्ठेयसोः । कनिष्ठः । कनीयान् । पक्षे यविष्ठः । अल्पिष्ठ इत्यादि ॥

2019. Before these affixes, कन् is optionally substituted for युवन् and अल्प ॥

